
प.प.श्रीवासुदेवानंदसरस्वतीप्रणीतं

अजपा जपविधानम्।



अजपाजप:
आचम्य. गतदिन सूर्योदयमारभ्याद्य
सूर्योदयपर्यंतं जाग्रत्स्वप्नसुषुप्त्याद्यव
स्थासु श्वासोच्छ्वासरूपेण संजातषट्
शताधिकैकविंशतिसहस्रसंख्याका
जपाजपं निवेदयामि पुनराचम्य
अद्य सूर्योदयमारभ्य श्वः सूर्योदयपर्यं
तं जाग्रदाद्यवस्थासु श्वासोच्छ्वासरू
पेण जायमानषट्शताधिकैकविंश
तिसहस्रसंख्याकाजपाजपं षट्च
क्रस्थगणपत्यादिदेवतारूपिपरमेश्व
रोद्देशेन हंकरिष्ये
हंसां जपेति शाय अंगुष्ठाभ्यां नमः। हंसीं
ब्रह्मणे तर्जनीभ्यां नमः। हंसूं विष्णवे म
ध्यमाभ्यां नमः। हंसैं शंभवे अनामिका
भ्यां नमः। हंसौं जीवात्मने कनिष्ठिकाभ्यां
नमः। हंसः परमात्मने करतलकरपृष्ठा
भ्यां नमः एवं हृदयादि। ध्यानं। गमागम
स्थं गमनादिशून्यं चिद्रूपदीपं तिमिरांध
नाशं। पश्यामि तं सर्वजनांतरस्थं नमामि
हंसं परमात्मरूपं। ध्यान सपूजा

(संकल्प) **आचम्य गतदिनसूर्योदयमारभ्याद्यसूर्योदयपर्यंतं जाग्रत्स्वप्नसुषुप्त्याद्यवस्थासु श्वासोच्छ्वासरूपेण संजातषट्शताधिकैक-विंशतिसहस्रसंख्याकाजपाजपं निवेदयामि। पुनराचम्य - अद्य सूर्योदयमारभ्य श्वः सूर्योदयपर्यंतं जाग्रदाद्यवस्थासु श्वासोच्छ्वासरूपेण**

जायमान संजातषट्शताधिकैकविंशतिसहस्त्रसंख्याकाजपाजपं षट्चक्रस्थ-गणपत्यादिदेवतारूपिपरमेश्वरोद्देशेनाहं करिष्ये।

(न्यास) **हं सां गणेशाय अङ्गुष्ठाभ्यां नमः। हं सीं ब्रह्मणे तर्जनीभ्यां नमः। हं सूं विष्णवे मध्यमाभ्यां नमः। हं सैं शंभवे अनामिकाभ्यां नमः। हं सौं जीवात्मने कनिष्ठिकाभ्यां नमः। हं सः परमात्मने करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।** (हं सां गणेशाय हृदयाय नमः। हं सीं ब्रह्मणे शिरसे स्वाहा। हं सूं विष्णवे शिखायै वषट्। हं सैं शंभवे कवचाय हुम्। हं सौं जीवात्मने नेत्रत्रयाय वौषट्। हं सः परमात्मने अस्त्राय फट्।)

ध्यानं गमागमस्थं गमनादिशून्यं चिद्दीपदीपं तिमिरान्धनाशम्।
पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम्।।


आधारे लिंगनाभौ प्रकटित हृ
मूले लकारे द्विपत्रे षोडशारे द्वि
दले द्वादशार्धे चतुष्के वासांत
षोडफकठ सहिते कंठदेशे स्व
अंतस्था थ युक्तं सकलं
रूपं नमामि। षट् शतं गणनाथाय
षट् सहस्त्रकं। विष्णवे षट् सहस्त्रं
षट्स्त्रं च शंभवे। जीवात्मने स
स्त्रं गुरवे तथा। परात्मने सहस्त्रं च
निवेदये। सकारेण बहिर्याति
विशेत्पुनः। सदा हंसः सोऽहं
अपतित त्वतः। हंस हंसाय
परमहंसाय धीमहि।
प्रचोदयात्। सोऽहं

मानसपूजा (लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।)

आधारे लिंगनाभौ प्रकटितहृदये तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के।
वासांते वालमध्ये डफकठसहिते कंठदेशे स्वराणां
हंक्षंतत्त्वार्थयुक्तं सकलदलयुतं वर्णरूपं नमामि।।१।।

षट्शतं गणनाथाय षट्सहस्त्रं च वेधसे विष्णवे षट्सहस्त्रं च षट्सहस्त्रं च शंभवे जीवात्मने सहस्त्रं च सहस्त्रं गुरवेऽपि च।। परात्मने सहस्त्रं च जपसंख्यां निवेदये।।


हंकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसोऽहंस इति प्राज्ञो जीवो जपति तत्त्वतः।।
हंसहंसाय विद्महे परमहंसाय धीमहि।।
तं नो हंसः प्रचोदयात्।। सोऽहम्।।

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीदत्त।

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीतं

अजपा गायत्री जपविधानम्।



॥ श्रीदत्त ॥

नील
अतिनील घनश्यामं नलिनायतलोचनम्। स्मरामि पुण्डरीकाक्षं तेन स्नातो भवाम्यहम्॥१॥ इति पठित्वा अनेन पूर्वं कार्यथा संकल्पिताऽजपागायत्री जपाख्येन कर्मभगवन्तो गणेश ब्रह्मविष्णु महेशजीवात्मपरमात्मगुरवः प्रीयन्तां न मम। ॐ तत्सत् ब्रह्मार्पणमस्तु। इति प्रोक्तेनाऽजपाजपं निवेदयेत्। सुमुखश्चेत्यादि देशकालौ संकीर्त्य हंसः हंसः हंसः इति त्रिः प्राणायामः। अद्य सूर्योदयमारभ्य सूर्योदयपर्यंतमहोरात्रयोर्जायमानस्वाभाविकषट्शताधिकैकविंशतिसहस्रसंख्याश्वासप्रश्वासात्मकैः हंसरूपाभ्यामेव षट्शतमूलाधारचक्रस्थगणेशप्रीत्यर्थं षट्सहस्रं स्वाधिष्ठानचक्रस्थब्रह्मप्रीत्यर्थं षट्सहस्रं मणिपूरचक्रस्थविष्णुप्रीत्यर्थं षट्सहस्रं अनाहतचक्रस्थहरप्रीत्यर्थं एकसहस्रं विशुद्धचक्रस्थजीवात्मप्रीत्यर्थं एकसहस्रं आज्ञाचक्रस्थपरमात्मप्रीत्यर्थं एकसहस्रं सहस्रचक्रस्थगुरुप्रीत्यर्थं हंसमंत्रेणाजपागायत्रीजपमहं करिष्ये। अस्य श्रीअजपामंत्रस्य हंस ऋषिः अव्यक्तगायत्री छंदः परमहंसो देवता हं बीजं सः शक्तिः सोऽहं कीलकं मम मुक्त्यर्थे जपे विनियोगः। शिरसि हंसऋषये नमः मुखे अव्यक्तगायत्रीछंदसे नमः हृदि परमहंसदेवतायै नमः गुह्ये हंबीजाय नमः पादयोः सः शक्तये नमः हंसः सोमात्मने अंगुष्ठाभ्यां नमः हंसः सूर्यात्मने तर्जनीभ्यां नमः हंसः निरंजनात्मने मध्यमाभ्यां नमः हंसः निराभासात्मने अनामिकाभ्यां नमः हंसः धर्मात्मने कनिष्ठिकाभ्यां नमः हंसः ज्ञानात्मने करतलकरपृष्ठाभ्यां नमः एवं हृदयादि न्यासम्॥ ... सूर्यौ॥ ... इति ध्यात्वा ... सर्वभक्तो नरात्मा॥ इति ... पंचोपचारैः संपूज्य ... कुर्यात्।

अतिनीलघनःश्यामं नलिनायतलोचनम्।

स्मरामि पुंडरीकाक्षं तेन स्नातो भवाम्यहम्। इति पठित्वा -

अनेन पूर्वेद्युर्यथा संकल्पिताऽजपागायत्रीजपाख्येन कर्मणा भगवन्तो गणेश-ब्रह्म-विष्णु-महेश- जीवात्म-परमात्म-गुरवः प्रीयन्तां न मम। ॐ तत्सद्ब्रह्मार्पणमस्तु। इति प्राक्तनाजपागायत्रीजपं निवेद्य सुमुखश्चेत्यादि देशकालौ संकीर्त्य (सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः।।१।। धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छ्रुणुयादपि।।२।। विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।३।। शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।४।। सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते।।५।। सर्वदा सर्वकार्येषु नास्ति तेषांममङ्गलम्। येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः।।६।। तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।७।। लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः। येषांमिन्दीवरश्यामो हृदयस्थो जनार्दनः।।८।। विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये।।९।। अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः।।१०।। सर्वेषारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः।।११।। अद्य ब्रह्मणो विष्णोराज्ञया प्रवर्तमानस्य.... द्वितीये परार्धे श्रीवैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बुद्वीपे भरतवर्षे भरतखण्डे देशे .... दक्षिणे तीरे --------- उत्तरे तीरे........... बौद्धावतारे अस्मिन वर्तमाने व्यावहारिके .... शके .... संवत्सरे .... अयने ..... ऋतौ मासोत्तम मासे ..... मासे ... पक्षे .... तिथौ .... वासरे, ... दिवसनक्षत्रे ...स्थिते चंद्रे ....स्थिते सूर्ये .... स्थिते श्रीदेवगुरौ एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं .... प्रवरान्वित .... गोत्रोत्पन्नोऽहं ..... शर्मा) **हंसः हंसः हंसः इति त्रिः प्राणायामः।** (संकल्प) **अद्य सूर्योदयमारभ्य श्वः सूर्योदयपर्यन्तमहोरात्रयोर्जाग्रत्स्वप्नसुषुप्त्यवस्थात्रये**

ज्ञानतोऽज्ञानतो वा षट्शताधिकैकविंशतिसहस्रसंख्याछ्वासनिःश्वासाभ्यां हंसरूपाभ्यामेव षट्शत मूलाधारचक्रस्थ गणेशप्रीत्यर्थं, षट्सहस्रं स्वाधिष्ठानचक्रस्थ ब्रह्मप्रीत्यर्थं षट्सहस्रं मणिपूरचक्रस्थ विष्णुप्रीत्यर्थं, षट्सहस्रं अनाहतचक्रस्थ हरप्रीत्यर्थं, एकसहस्रं विशुद्धचक्रस्थ जीवात्मप्रीत्यर्थं, एकसहस्रं अज्ञाचक्रस्थ परमात्मप्रीत्यर्थं, एकसहस्रं सहस्रचक्रस्थ गुरुप्रीत्यर्थं हंस मंत्रेणाजपागायत्रीजपमहं करिष्ये। अस्य श्री अजपामंत्रस्य हंस ऋषिः अव्यक्तगायत्री छंदः परमहंसो देवता हं बीजं सः शक्तिः विमुक्तये जपे विनियोगः शिरसि। हंस ऋषये नमः मुखे। अव्यक्तगायत्री छंदसे हृदि। परमहंसदेवतायै नमः गुह्ये। हं बीजाय नमः पादयोः। सः शक्तय नमः नाभौ। हं सः सोमात्मने अङ्गुष्ठाभ्यां नमः। हं सः सूर्यात्मने तर्जनीभ्यां नमः। हं सः निहंतात्मने मध्यमाभ्यां नमः। हं सः निराभासात्मने नमः अनामिकाभ्यां नमः। हं सः धर्मात्मने कनिष्ठिकाभ्यां नमः। हं सः ज्ञानात्मने करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि (हं सः सोमात्मने हृदयाय नमः। हं सः सूर्यात्मने शिरसे स्वाहा। हं सः निहंतात्मने शिखायै वषट्। हं सः निराभासात्मने नमः कवचाय हुं। हं सः धर्मात्मने नेत्रत्रयाय वौषट्। हं सः ज्ञानात्मने अस्त्राय फट्।)

ध्यानम्।।


द्यौर्मूर्धानं वदन्ति विप्रा खं वै नाभिं चक्षुषी चंद्रसूर्यौ।।
दिशः श्रोत्रे यस्य पादौ क्षितिं च ध्यातव्योऽसौ सर्वभूतान्तरात्मा।।१।।

इति ध्यात्वा मानसोपचारैः संपूज्य (लं पृथिव्यात्मकं गंधं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।) **प्रणम्य पुन..र्द्धं स इति मंत्रेण प्राणायामत्रयं कुर्यात्।**

मंत्र विधाने

श्रीगुरुः शरणम्।

श्री अन्नपूर्णा मंत्र


श्री: आचम्य प्राणानायम्य ममाभीष्टार्थसि
द्धिद्वारा श्रीअंनपूर्णाप्रीत्यर्थं तन्मंत्रजपमहं क
रिष्ये दर्वीकरां महादेवीं सर्वसौभाग्य संयु
तां अन्नपूर्णामुमां गौरीं ध्यायाभीष्टप्रदायि
नीं लं पृथिव्यात्मकं गंधं परिकल्पयामि । हं आ
काशात्मकं पुष्पं परिकल्पयामि । यं वाय्वात्म
कं धूपं परिकल्पयामि । रं अग्न्यात्मकं दीपं
परिकल्पयामि वं अमृतात्मकं नैवेद्यं
परिकल्पयामि सं सर्वात्मकं सर्वोपचारान्प
रिकल्पयामि

नमो भगवति माहेश्वरि अंनपूर्णे ममा
भिलषितमन्नं देहि देहि १०८
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपं जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्व
रि अनेन जपेन श्रीअंनपूर्णा देवता
प्रीयतां आचमेत्

श्रीदत्त। **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीअन्नपूर्णाप्रीत्यर्थं तन्मन्त्रजपमहं करिष्ये।** आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु

चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अथ ध्यानम्।

दर्वीकरां महादेवीं सर्वसौभाग्यसंयुताम्।

अन्नपूर्णामुमां गौरीं ध्यायामीष्टप्रदायिनीम्।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलषितमन्नं देहि देहि। १०८


गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वरि।।

अनेन जपेन श्रीअन्नपूर्णा देवता प्रीयताम्। आचामेत्।


मंत्र विधाने

श्रीगुरुः शरणम्।

श्री अन्नपूर्णा मंत्र २



श्रीदत्त आचम्य मम
भीष्टार्थ सिद्धि द्वारा श्री अ
न्नपूर्णा प्रीत्यर्थं तन्मंत्र ज
पमहं करिष्ये अस्य मंत्रस्य
ईश्वर ऋषिः शिरसि गायत्री
छंदः मुखे अन्नपूर्णा देवता
हृदये । ध्यानं । सर्व सौ
भाग्य सं [illegible] कोद वीं हस्तां म
हेश्वरी । भक्ताभीष्ट प्रदां दे
वी मंत्रपूर्णां भजाम्यहं । लं
पृथिव्यात्मकं गंधं परिकल्प
यामि । हं आकाशात्मकं पुष्पं
। यं वाय्वात्मकं धूपं - रं आग्न्या
त्मकं दीपं - वं अमृतात्मकं
~~पं - वं अमृतात्म~~ नैवेद्यं - सं सर्वा
त्मकं सर्वोपचारान् । माला
नमो भगवति माहेश्वरि अ
न्नपूर्णे ममाभिलाषितमन्नं देहि देहि



जपं तेमा [illegible] गु
ह्याति गुह्य गोप्त्री त्वं गृहाणास्म
त्कृतं जपं जपासिद्धिर्भवतु त्व
त्प्रसादान्महेश्वरी अनेन [illegible]
श्री अन्नपूर्णा प्रीयतां आचा
मेत्

श्रीदत्त। **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय

नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य** (संकल्प) **ममाभीष्टार्थसिद्धिद्वारा श्रीअन्नपूर्णाप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। अस्य मंत्रस्य ईश्वर ऋषिः शिरसि, गायत्री छंदः मुखे, अन्नपूर्णा देवता हृदये।**

ध्यानम्। **सर्वसौभाग्यसंयुक्ता दर्वीहस्तां महेश्वरीम् ।**
भक्ताभीष्टप्रदां देवीमन्नपूर्णां भजाम्यहम्।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलषितमन्नं देहि देहि।


१०८

जपांते मालां शिरसि निधाय ..
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वरि।।
अनेन जपेन श्रीअन्नपूर्णा प्रीयताम्। आचामेत्।


मंत्र विधाने

श्रीगुरुः शरणम्।

मृतापत्यत्वानपत्यदोषपरिहरण मंत्र।


मम मृतापत्यत्वानपत्यत्वा
दी दोषपरिहरेण दीर्घायु
ष्मत्सुपुत्रप्राप्तीद्वाश्री
संतानप्रदगोपालप्रीत्य
र्थं लक्षसंख्याक संतान
गोपालजपं करिष्ये
पुर्वसंकल्पीतजपस
ख्यां परिपूर्णार्थं अमु
खसंकजपं करिष्ये

१. मम मृतापत्यत्वानपत्यत्वादीदोषपरिहरेण दीर्घायुष्मुत्सुपुत्रप्राप्तीद्वारा श्रीसंतानप्रदगोपालप्रीत्यर्थं लक्षसंख्याक संतानगोपालजपं करिष्ये। किंवा **पूर्वसंकल्पितजपपरिपूर्णार्थं अमुकसंख्याक जपं करिष्ये।**


(अमुक) कुमा नाम्न्या मृतापत्यत्व दोषनिरसन
न दीर्घायुष्मत्सुपुत्र प्राप्ति द्वारा श्री दत्ता
त्रेय प्रीत्यर्थं पटलस्थ तन्मंत्रेण सह
स्त्रवार नागकेसराभिमंत्रणं करिष्ये
मंत्रः
ॐ परब्रह्म परमात्मने नम (उमां) दी
र्घजीविसुतां कुरु कुरु ॥
(नाम्न्याः) अमुक नाम्न्याः जाति वंध्यात्व दोष
निरसनेन दीर्घायुष्मत्सुपुत्र प्राप्ति द्वा
रा श्री दत्तात्रेय प्रीत्यर्थं पटलस्थ तन्
मंत्रेण सहस्त्रवारं नागकेसराभिमंत्र
णं करिष्ये
ॐ नमः सिद्धरूपाय
सुपुत्रां कुरु कुरु ॥

२. अमुकनाम्न्या मृतापत्यत्वदोषनिरसन दीर्घायुष्मत्सुपुत्रप्राप्तिद्वारा श्रीदत्तात्रेयप्रीत्यर्थं पटलस्थ तन्मंत्रेण सहस्त्रवार नागकेसराभिमंत्रणं करिष्ये।

मंत्रः

ॐ परब्रह्म परमात्मने नम (अमुकां**) दीर्घजीविसुतां कुरु कुरु।।**

जातिवंध्यात्वदोषनिरसन मंत्र।

३. अमुकनाम्न्या जातिवंध्यात्वदोषनिरसन दीर्घायुष्मत्सुपुत्रप्राप्तिद्वारा श्रीदत्तात्रेयप्रीत्यर्थं पटलस्थ तन्मंत्रेण सहस्त्रवार नागकेसराभिमंत्रणं करिष्ये।

मंत्रः

ॐ नमः सिद्धरूपाय (अमुकां) सुपुत्रां कुरु कुरु।।

संतानप्रद गोपाल मंत्र।

श्रीदत्त ॐ। चम्यमताप
सत्तानप स्यत्व दोषानिरस
नेन दीर्घो युष्मत्सुपुत्राप्रा
प्तिद्वारा श्रीसंतानप्रदगो
पालकृष्णप्रीत्यर्थं तन्मंत्रजप
महं करिष्ये ॐ। सन्ने उपविश्य
अस्यमंत्रस्य नारद ऋषिः शि
रसि। अनुष्टुप् छन्दः मुखे
श्रीसंतानप्रद गोपालकृष्ण देव
ता हृदये क्लीं बीजं नाभौ न
मः शक्तिः पादयोः। देवकीसु
तेति कीलकं सर्वांगे। देव
कीसुत अंगुष्ठाभ्यां नमः। गो
विंद तर्जनीभ्यां नमः। वासुदे
व मध्यमाभ्यां नमः। जगत्पते
अनामिकाभ्यां नमः। देहि मे त
नयं कृष्ण। कनिष्ठिकाभ्यां
नमः। त्वामहं शरणं गतः क
रतल कर पृष्ठाभ्यां नमः
ध्यानं। यमकौ का त्समानी
यजीवयि वागुरोः सुतं पु
नयीगरवे दातं ध्याये संता
नदं हरिं मंत्रः
देवकीसुत गोविंद वासुदेव
जगत्पते। देहि मे तनयं कृ
ष्ण त्वामहं शरणं गता

श्रीदत्त। आचम्य। मृतापत्यत्वानपत्यत्वदोषनिरसनेन दीर्घायुष्मुत्सुपुत्रप्राप्तीद्वारा श्रीसंतानप्रदगोपालप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसने उपविश्य अस्य मंत्रस्य नारद ऋषिः शिरसि। अनुष्टुप् छंदः मुखे। श्रीसंतानप्रद गोपालो देवता हृदये। क्लीं बीजं नाभौ। नमः शक्तिः पादयोः। देवकीसुतेति कीलकं सर्वांगे।

देवकीसुत अंगुष्ठाभ्यां नमः। गोविंद तर्जनीभ्यां नमः। वासुदेव मध्यमाभ्यां नमः। जगत्पते अनामिकाभ्यां नमः। देहि मे तनयं कृष्ण कनिष्ठिकाभ्यां नमः। त्वामहं शरणं गता करतलकरपृष्ठाभ्यां नमः।

ध्यानम् - यमलोकात्समानीय जीवयित्वा गुरोः सुतं।
पुनर्यो गुरवेऽदात्तं ध्याये संतानदं हरिम्।।१।।

मंत्रः -


ॐ क्लीं नमः देवकीसुत गोविंद वासुदेव जगत्पते। देहि मे तनयं कृष्ण त्वामहं शरणं गता।।

१०००००

अनेन जपेन संतानप्रद गोपालकृष्णः प्रीयताम्। आचामेत्।

श्रीगुरुः शरणम्।

चित्रसेन गंधर्व मंत्र।


मोद्वाहप्रतिबंधपरिहरणे
नसद्य उद्वाहसिद्धये.चित्रसे
नगंधर्वमंत्रजपंकरिष्ये ॐ
श्रीं ह्रीं क्लीं राजन्गगनाश्रय चि
त्रसेन कन्यां प्रयच्छ स्वाहा


ममोद्वाहप्रतिबंधपरिहरणेन सद्य उद्वाहसिद्धये चित्रसेनगंधर्वमंत्रमहं करिष्ये। अस्य मंत्रस्य ब्रह्मा ऋषिः चित्रसेन गंधर्वो देवता जपे विनियोगः।

मंत्र

ॐ श्रीं ऱ्हीं क्लीं राजन् गगनाश्रय चित्रसेन कन्यां प्रयच्छ स्वाहा।


१ लक्ष.

पत्नीलाभाचा मंत्र.


ॐ ह्रीं पत्नीं मनोरमां देहि
मनोवृत्तानुसारिणीं
तारिणीं दुर्गसंसार
सागरस्य कुलोद्भवां

ॐ ऱ्हीं पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां।।

द्रां दत्तात्रेयाय नमः।


श्रीः आचम्य. ममाभीष्टार्थसिद्धिद्वारा श्रीद
त्तात्रेयप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये आस
नादि कृत्वा अस्य मंत्रस्य सदाशिवऋषिः गायत्री
छंदः श्रीदत्तात्रेयो देवता द्रां बीजं नमः शक्तिः दत्तात्रेया
येति कीलकं जपे विनियोगः। ॐ द्रां अंगुष्ठाभ्यां नमः ॐ
द्रीं तर्जनीभ्यां नमः ॐ द्रूं मध्यमाभ्यां नमः ॐ द्रैं
अनामिकाभ्यां नमः द्रौं कनिष्ठिकाभ्यां नमः ॐ द्रः
करतलकरपृष्ठाभ्यां नमः एवं हृदयादि। ध्यानं
मालाकमंडलु [illegible] चैव [illegible] चात्रिरक्तं। शंखचं
ध्यानं तु दत्तात्रेयं नमाम्यहं मालां संपूज्य
श्री दत्तात्रेयाय नमः १०८ अनेन जपेन श्रीद
त्तात्रेयः प्रीयतां। ईश्वरोगुरुरात्मेति मूर्तिभेदविभागिने
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः आचामेत्

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। प्राणानायम्य देशकालौ संकीर्त्य संकल्प**)**

ममाभीष्टार्थसिद्धिद्वारा श्रीदत्तात्रयप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य दत्तात्रेयमंत्रस्य सदाशिव ऋषिः गायत्री छन्दः दत्तात्रेयो देवता द्रां बीजं नमः शक्तिः दत्तात्रेयायेति कीलकम्।

(करन्यास) **ॐ द्रां अङ्गुष्ठाभ्यां नमः, ॐ द्रीं तर्जनीभ्यां नमः,**

ॐ द्रूं मध्यमाभ्यां नमः, ॐ द्रैं अनामिकाभ्यां नमः, ॐ द्रौं कनिष्ठिकाभ्यां नमः, ॐ द्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।

(अङ्गन्यास ॐ द्रां हृदयाय नमः, ॐ द्रीं शिरसे स्वाहा, ॐ द्रूं शिखायै वषट्, ॐ द्रैं कवचाय हुं, ॐ द्रौं नेत्रत्रयाय वौषट्, ॐ द्रः अस्त्राय फट्। ॐ द्रां द्रीं द्रूं द्रैं द्रौं द्रः इति दिग्बंधः।)

अथ ध्यानम्। मालां कमंडलुं चैव डमरुं च त्रिशूलकम्।
शंखं चक्रंदधानं तं दत्तात्रेयं नमाम्यहम्।।१।।

मालां संपूज्य

लं पृथिव्यात्मकं गंधं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

द्रां दत्तात्रेयाय नमः। १०८

(जपान्ते मालां शिरसि निधाय पुनर्हृदयादि न्यासान्कृत्वा - मां हृदयाय नमः, मीं शिरसे स्वाहा, मूं शिखायै वषट्, मैं कवचाय हुं, मौं नेत्रत्रयाय वौषट्, मः अस्त्राय फट्।)

अनेन जपेन श्रीदत्तात्रेयः प्रीयताम्।
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागेन।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः।।१।।


आचामेत्। (आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

ह्या मंत्राचा दत्तपुराणांतील संदर्भ -

सैकाक्षरं चतुर्थ्यन्तं दत्तात्रेयं नमोन्वितम्।।
अष्टार्णमन्त्रं गायत्रं विद्धि द्रां बीजमस्य तु।।१७:२६।।

द्रां दत्तात्रेयाय नमः। (२)

श्रीदत्त
आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम
ममाभीष्टार्थसिद्ध्यर्थं द्रां श्रीदत्तात्रेयप्रीत्यर्थं त
मंत्रजपमहं करिष्ये। आसनादि कृत्वा। अस्य श्री
दत्तात्रेयमंत्रस्य सदाशिव ऋषिः। शिरसि। गाय
त्री छंदः मुखे। श्रीदत्तात्रेयो देवता हृदये। द्रां बी
जं नाभौ। नमः शक्तिः पादयोः। दत्तात्रेयायेति की
लकं सर्वांगे। ॐ द्रां अंगुष्ठाभ्यां नमः ॐ द्रीं तर्जनी
भ्यां। ॐ द्रूं मध्यमाभ्यां नमः ॐ द्रैं अनामिकाभ्यां
नमः ॐ द्रौं कनिष्ठिकाभ्यां नमः ॐ द्रः करतलकर
पृष्ठाभ्यां नमः। ॐ द्रां हृदयाय नमः ॐ द्रीं शिरसे
स्वाहा ॐ द्रूं शिखायै वषट् ॐ द्रैं कवचाय हुं ॐ द्रौं
नेत्रत्रयाय वौषट् ॐ द्रः अस्त्राय फट् ॐ द्रां द्रीं द्रूं द्रैं
द्रौं द्रः ~~अस्त्राय फट्~~ इति दिग्बंधः। अथ ध्यानं
~~माला कमंडलु दुरधः कर पद्म युग्मे मध्यस्थ पा~~
णियुगले डमरु त्रिशूले। यस्यस्त ऊर्ध्वकरयोः
शुभशंखचक्रे वंदे तमत्रिवरदं भुजषट्कयुक्तं
मानसपूजा। लं पृथिव्यात्मकं गंधं परिकल्प
यामि हं आकाशात्मकं पुष्पं परिकल्पयामि, यं
वाय्वात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं
परिकल्पयामि। वं अमृतात्मकं ~~सर्व~~ नैवेद्यं परिक
ल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।
आपातु देवो निखिलदेवतात्मा संसारकूपपतितं गभी
रात्तमादिश्य वरमंत्रमयं धुनोतु मे सर्वमघं हृदिस्थं
माला प्रार्थना। ॐ महामाये महामाले सर्वशक्तिस्वरू
पिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।
जप:। जपांते मालां शिरसि निधाय
हृदयादिन्यासान् कृत्वा। गुह्यातिगुह्यगोप्ता त्वं गृ
हाणास्मत्कृतं जपं। जपसिद्धिर्भवतु मे त्वत्प्रसा


[illegible] महेश्वर। अनेन जपेन श्रीदत्तात्रेयः प्री
यतां। दुःस्वप्न दुःशकुन दुर्गति दौर्मनस्य दु
[illegible] दुर्व्यसन दुःसह दुर्यशांसि। उत्पात ताप
[illegible] भीति मम ज्वराति व्याधींश्च नाशयतु मे
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] भगवान्दत्तः सदा वसतु मे हृदि। [illegible]
[illegible]
[illegible] कुर्यात्

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य देशकालौ संकीर्त्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीदत्तात्रयप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य दत्तात्रेयमंत्रस्य सदाशिव ऋषिः शिरसि गायत्री छन्दः मुखे दत्तात्रेयो देवता हृदये द्रां बीजं नाभौ नमः शक्तिः पादयोः दत्तात्रेयायेति कीलकम् सर्वांगे।

(करन्यास) **ॐ द्रां अङ्गुष्ठाभ्यां नमः, ॐ द्रीं तर्जनीभ्यां नमः, ॐ द्रूं मध्यमाभ्यां नमः, ॐ द्रैं अनामिकाभ्यां नमः, ॐ द्रौं कनिष्ठिकाभ्यां नमः, ॐ द्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास) **ॐ द्रां हृदयाय नमः, ॐ द्रीं शिरसे स्वाहा, ॐ द्रूं शिखायै वषट्, ॐ द्रैं कवचाय हुं, ॐ द्रौं नेत्रत्रयाय वौषट्, ॐ द्रः**

अस्त्राय फट्। ॐ द्रां द्रीं द्रूं द्रैं द्रौं द्रः इति दिग्बंधः।

अथ ध्यानम्।

मालाकमंडलुरधःकरपद्मयुग्मे मध्यस्थपाणियुगुले डमरूत्रिशूले।
यस्य स्त ऊर्ध्वकरयोः शुभशंखचक्रे वन्दे तमत्रिवरदं भुजषट्कयुक्तम्।।१।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

द्रां दत्तात्रेयाय नमः। १०८

जपान्ते मालां शिरसि निधाय र्हदयादि न्यासान्कृत्वा (मां हृदयाय नमः, मीं शिरसे स्वाहा, मूं शिखायै वषट्, मैं कवचाय हुं, मौं नेत्रत्रयाय वौषट्, मः अस्त्राय फट्।)

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।


अनेन जपेन श्रीदत्तात्रेयः प्रीयताम्।

दुःस्वप्न-दुःशकुन-दुर्गति-दौर्मनस्य-दुर्भिक्ष-दुर्व्यसन-दुःसह-दुर्यशांसि।
उत्पाततापविषभीतिमसद्ग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः।।

यस्यास्ति माहुरे निद्रा निवासः सह्यपर्वते।
भागीरथ्यां सदा स्नानं ध्यानं गंधर्वपत्तने।
कुरुक्षेत्रे चाचमनं धूतपापेश्वरे तथा।
विभूतिधारणं संध्या करहाटे श्रियः पुरे।
भिक्षा विठ्ठलपुर्यस्य सुगंधिद्रव्यधारणम्।
भुक्तिः सारपुरे सायंसंध्या पश्चिमसागरे।
स एष भगवान्दत्तः सदा वसतु मे हृदि।

आचम्य आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

दत्तात्रेयो हरिः कृष्ण....।



श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। प्राणानायम्य) **(**संकल्प**) ममाभीष्टसिद्धिद्वारा श्रीदत्तात्रयप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

अस्य मंत्रस्य सदाशुव ऋषिः शिरसि। अनुष्टुभ् छन्दः मुखे दत्तात्रेयो देवता हृदये।

अथ ध्यानम्। षड्भुजं सुमुखं देवं दत्तात्रेयं दिगंबरम्।
ध्यायामि पुंडरीकाक्षं भक्ताभीष्टवरप्रदम्।।१।।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

दत्तात्रेयो हरिः कृष्ण उन्मत्तानंददायकः।
मुनिर्दिगंबरो बालः पिशाचो ज्ञानसागरः।।१।। १०८

अनेन जपेन श्रीदत्तात्रेयः प्रीयताम्। आचामेत्

श्रीदत्तपुराणांत ह्या मंत्राच्या विधानाविषयी खालीलप्रमाणे सांगितले आहे

.

दत्तात्रेय हरे कृष्ण उन्मत्तानन्ददायक।।३३।।
दिगम्बर मुने बाल पिशाचज्ञानसागर।।
आनुष्टुभः शिवार्षोऽयं षड्भुजात्रेयदैवतः।।३४।।
द्वाभ्यां द्वाभ्यां हृच्छिरसोः शिखायामेकतो गले।।
द्वाभ्यामेकैकेन दोर्दृग्द्वये द्वाभ्यां तथास्त्रके।।३५।।
विन्यस्य जपिता दोषमुक्तः सर्वोपकारकृत्।।

दत्ते**त्यानुष्टुभः**।।३३।।३४।। *दत्तात्रेये*ति हृदि *हरे श्रीकृष्णे*ति शिरसि *उन्मत्तेति* शिखायां *आनन्ददायक दिगम्बरे*ति कण्ठे *मुने* इति बाह्वोः *बाले*ति नेत्रयोः *पिशाचज्ञानसागरे*त्य**स्त्रे** करयोरप्येवम्।।३५।।

ह्यानुसार —


अंगन्यास - दत्तात्रेय हृदयाय नमः। हरे श्रीकृष्ण शिरसे नमः। उन्मत्त शिखायै नमः। आनन्ददायक दिगम्बर कण्ठाय नमः। मुने बाह्वोः नमः। बाल नेत्रयोः नमः। पिशाच ज्ञानसागर अस्त्राय नमः।

करन्यास -

दत्तात्रेय अङ्गुष्ठाय नमः। हरे श्रीकृष्ण तर्जनीभ्यां नमः। उन्मत्त मध्यमाभ्यां नमः। आनन्ददायक दिगम्बर अनामिकाभ्यां नमः। मुने कनिष्ठिकाभ्यां नमः। बाल नेत्रयोः नमः। पिशाच ज्ञानसागर करतलकरपृष्ठाय नमः।

श्रीगुरुः शरणम्।

ॐ नमो भगवते दत्तात्रेयाय।



श्री: आचम्य प्राणानायम्य ममाभीष्टार्थसिध्धिद्वा
रा श्रीदत्तात्रेयप्रीत्यर्थं तन्मंत्रजपं करिष्ये अस्य दत्तात्रे
यमंत्रस्य सदाशिवऋषि: जगती छंद: दत्तात्रेयो देव
ता ॐ बीजं नम: शक्ति: दत्तात्रेयायेति कीलकं जपे वि
नियोग: द्रां अंगुष्ठाभ्यां नम: द्रीं तर्जनीभ्यां नम: द्रूं
मध्यमाभ्यां नम: द्रैं अनामिकाभ्यां नम: द्रौं कनिष्ठिका
भ्यां नम: द्र: करतलकरपृष्ठाभ्यां नम: एवं हृदयादि॰
मालाकमंडलुरध: करपद्मयुग्मे मध्यस्थपाणियुगले
डमरुत्रिशूले। यस्यास्त ऊर्ध्वकरयो: शुभशंखचक्रे
वंदे तमत्रिवरदं भुजषट्कयुक्तं। लं पृथिव्यात्मकं
गंधं परिकल्पयामि। हं आकाशात्मकं पुष्पं। यं वाता
त्मकं धूपं। रं अग्न्यात्मकं दीपं। वं अमृतात्मकं नैवेद्यं
सं सर्वात्मकं सर्वोपचारान्परिकल्पयामि। मालां॰

महामाले महामाये सर्वशक्तिस्वरूपिणि। चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिध्धिदा भव। जप:
ॐ नमो भगवते दत्तात्रेयाय १०८
जपं। तेमालां शिरसि निधाय हृदयादिन्यासा
न्कृत्वा गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं
पं। सिध्धिर्भवतु मे च त्वत्प्रसादात्। ततो
अनेन जपेन श्रीदत्तात्रेय: प्रीयतां आचम्य
आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं
कुर्यात्

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। **प्राणानायम्य** देशकालौ संकीर्त्य संकल्प**)**

ममाभीष्टार्थसिद्धिद्वारा श्रीदत्तात्रयप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य दत्तात्रेयमंत्रस्य सदाशिव ऋषिः जगती छन्दः दत्तात्रेयो देवता ॐ बीजं नमः शक्तिः दत्तात्रेयायेति कीलकम् जपे विनियोगः।

(करन्यास) **ॐ द्रां अङ्गुष्ठाभ्यां नमः, ॐ द्रीं तर्जनीभ्यां नमः, ॐ द्रूं मध्यमाभ्यां नमः, ॐ द्रैं अनामिकाभ्यां नमः, ॐ द्रौं कनिष्ठिकाभ्यां नमः, ॐ द्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास ॐ द्रां हृदयाय नमः, ॐ द्रीं शिरसे स्वाहा, ॐ द्रूं शिखायै वषट्, ॐ द्रैं कवचाय हुं, ॐ द्रौं नेत्रत्रयाय वौषट्, ॐ द्रः अस्त्राय फट्। ॐ द्रां द्रीं द्रूं द्रैं द्रौं द्रः इति दिग्बंधः।)

अथ ध्यानम्।

मालाकमण्डलुरधःकरपद्मयुग्मे। मध्यस्थपाणियुगुले डमरुत्रिशूले।।
यस्यस्त ऊर्ध्वकरयोः शुभशंखचक्रे। वन्दे तमत्रिवरदं भुजषट्कयुक्तम्।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ नमो भगवते दत्तात्रेयाय । १०८

जपान्ते मालां शिरसि निधाय हृदयादि न्यासान्कृत्वा (ॐ द्रां हृदयाय नमः, ॐ द्रीं शिरसे स्वाहा, ॐ द्रूं शिखायै वषट्, ॐ द्रैं कवचाय हुं, ॐ द्रौं नेत्रत्रयाय वौषट्, ॐ द्रः अस्त्राय फट्।)


गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं।
जपसिद्धिर्भवतु मे त्वत्प्रसादाद्यतीश्वर।।

अनेन जपेन श्रीदत्तात्रेयः प्रीयताम्।

आचम्य आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्।
(आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

श्रीगुरुः शरणम्।

श्रीमद्दत्तपुराणोक्त मंत्र.


१ द्रां
६ ॐ श्रीं ह्रीं क्रों ग्लौं द्रां
८ ॐ द्रां दत्तात्रेयाय नमः ।
१२ ॐ आं ह्रीं क्रों एहि दत्तात्रेयाय [illegible]
१६ ॐ ऐं क्रों क्लीं ह्रूं [illegible] ह्रां ह्रीं
ह्रूं सौः दत्तात्रेयाय स्वाहा
२० ॐ ऐं क्रों क्लीं क्लूं ह्रां ह्रीं ह्रूं सौः श्री
विष्णवे दत्तात्रेयाय स्वाहा
३२ दत्तात्रेय हरे कृष्ण उन्मत्तानंद दायक
दिगंबर मुने बाल पिशाच ज्ञानसागर

द्रां

लकारं वह्निसंयुक्तं सतुण्डाक्षरबिन्दुकम्।।१८।।
तदर्चने मनुं विद्धि छन्दो गायत्रिकास्य च।।
सदाशिव ऋषिर्देवो दत्तात्रेयश्चतुर्भुजः।।१९।।
मनुरेकाक्षरोऽस्यायं जाप्यो गर्भादितारणः।।
अस्य मंत्रस्य सदाशिव ऋषिः गायत्री छंदः चतुर्भुज दत्तात्रेयो देवता।

ॐ श्रीं ऱ्हीं क्रों ग्लौ (लं) द्रां

तारः श्रीदुर्गा क्रों भूमिदत्तैकाक्षरयुङ्मनुः।।२०।।
षडक्षरो योगदोऽयं सर्वसंपत्समृद्धिकृत्।।
ऋष्यादिः पूर्ववन्न्यासो बीजैः शाखा हृदादिषु।।२१।।
दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं विभुम्।।
आत्ममायारतं देवमवधूतं दिगम्बरम्।।२२।।
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम्।।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम्।।२३।।
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम्।।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम्।।२४।।
इत्यौपनिषदं दत्तं ध्यात्वैकाग्र्यं मनुं जपेत्।।
स वाञ्छितफलं भुक्त्वा परत्र श्रेय आप्नुयात्।।२५।।
अस्य मंत्रस्य सदाशिव ऋषिः गायत्री छंदः चतुर्भुज दत्तात्रेयो देवता।

(करन्यास) **ॐ अङ्गुष्ठाभ्यां नमः, श्रीं तर्जनीभ्यां नमः, ऱ्हीं मध्यमाभ्यां नमः, क्रों अनामिकाभ्यां नमः, ग्लौं कनिष्ठिकाभ्यां नमः, द्रां करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास) **ॐ हृदयाय नमः, श्रीं शिरसे स्वाहा, ऱ्हीं शिखायै वषट्, क्रों कवचाय हुं, ग्लौं नेत्रत्रयाय वौषट्, द्रां अस्त्राय फट्। ॐ श्रीं ऱ्हीं क्रों ग्लौं द्रां इति दिग्बंधः।**

ध्यान दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं विभुम्।।
आत्ममायारतं देवमवधूतं दिगम्बरम्।।२२।।
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम्।।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम्।।२३।।
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम्।।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम्।।२४।।
(बालार्कप्रभमीन्द्रनीलजटिलं भस्मांगरागोज्वलम्
शांतं नादविलीनचित्तपवनं शार्दूलचर्माम्बरम्।।
ब्रह्मज्ञैः सनकादिभिः परिवृतं सिद्धैः समाराधितं
दत्तात्रेयमुपास्महे हृदि मुदा ध्येयं सदा योगिभिः।।)

द्रां दत्तात्रेयाय नमः।

सैकाक्षरं चतुर्थ्यन्तं दत्तात्रेयं नमोन्वितम्।।
अष्टार्णमन्त्रं गायत्रं विद्धि द्रां बीजमस्य तु।।२६।।
चतुर्थी कीलकं शक्तिर्नम आर्षः सदाशिवः।।
दत्तात्रेयपदस्यार्थः सत्यानन्दचिदात्मकः।।२७।।

ॐ आँ र्‍हीं क्रों एहि दत्तात्रेय स्वाहा।

प्रह्वीभावो नमोर्थस्तु पूर्णानन्दैकविग्रहः।।
तारं सबिन्दुं तुण्डार्णं दुर्गां क्रों तुर्यमेहि च।।२८।।
दत्तात्रेयेति संबुद्ध्या स्वाहान्तं द्वादशाक्षरम्।।
सर्वकामदुघं विद्धि गायत्रं भो शिवार्षकम्।।२९।।
वराभयदहस्तं यो भजेदाभ्यां महाव्रतः।।
सर्वान्कामानिहैवाप्त्वा सोऽमृतो भवति ध्रुवम्।।।३०।।
ॐ बीजं स्वाहात्र शक्तिः संबुद्धिः कीलकं क्रमात्।।
द्वाभ्यां हृदि च के द्वाभ्यां शिखायां क्रियया न्यसेत्।।३१।।
संबुद्धिभ्यां स्कंधचक्षुर्द्वयेस्त्रेन्त्येन तन्मयः।।
चतुर्बीजैः सक्रियाख्यान्त्याभ्यां न्यासं करादिषु।।३२।।
कृत्वा यजेद्देवदेवं यन्त्रन्यस्तमभीष्टदम्।।

अस्य मंत्रस्य भगवान सदाशिव ऋषिः गायत्री छंदः दत्तात्रेयो देवता ॐ बीजं स्वाहा शक्तिः दत्तात्रेयेति कीलकं जपे विनियोगः।

(करन्यास) **ॐ आँ अङ्गुष्ठाभ्यां नमः, र्‍हीं क्रों तर्जनीभ्यां नमः, एहि मध्यमाभ्यां नमः, दत्तात्रेय अनामिकाभ्यां नमः, दत्तात्रेय कनिष्ठिकाभ्यां नमः, स्वाहा करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास) **ॐ आँ हृदयाय नमः, र्‍हीं क्रों शिरसे स्वाहा, एहि शिखायै वषट्, दत्तात्रेय कवचाय हुं, दत्तात्रेय नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट्। इति दिग्बंधः।**

ध्यान वराभयदहस्त

ॐ यं (ऐं) क्लां क्लीं क्लं ऱ्हां ऱ्हीं ऱ्हूं सौः दत्तात्रेयाय स्वाहा (नमः)।

तारं वायुं क्लां कामं क्लं ह्रां दुर्गां हूं च विद्धि सौः।।३६।।
दत्तात्रेयं चतुर्थ्यन्तं स्वाहान्तं षोडशाक्षरं।।
वायुस्थाने तु वाग्बीजं नमोन्ते योजयाथवा।।३७।।
स्वाहैकत्र नमोऽन्यत्र शक्तिर्बीजं च कीलकम्।।
तारश्चतुर्थी गायत्री मंत्रराजः शिवोदितः।।३८।।
हृदि द्वे के त्रीणि शिखायां चैकं कवचे दृशोः।।
चतुर्थीमन्त्यमस्त्रे च विन्यस्य जपकामदम्।।३९।।
सच्चिदानन्दस्वरूपी सुखी मुक्तो भवत्यतः।।
सिद्धगन्धर्वादिसङ्गी लक्षजाप्यष्टसिद्धिभाक्।।४०।।

अस्य मंत्रस्य सदाशिव ऋषिः गायत्री छंदः दत्तात्रेयो देवता स्वाहा शक्तिः ॐ बीजं दत्तात्रेयायेति कीलकं जपे विनियोगः।

(करन्यास) **ॐ यं अङ्गुष्ठाभ्यां नमः, क्लां क्लीं क्लं तर्जनीभ्यां नमः, ऱ्हां मध्यमाभ्यां नमः, दत्तात्रेयाय अनामिकाभ्यां नमः, दत्तात्रेयाय कनिष्ठिकाभ्यां नमः, स्वाहा करतलकरपृष्ठाभ्यां नमः।**

(अङ्गन्यास) **ॐ यं हृदयाय नमः, क्लां क्लीं क्लं शिरसे स्वाहा, ऱ्हां शिखायै वषट्, दत्तात्रेयाय कवचाय हुं, दत्तात्रेयाय नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट्। इति दिग्बंधः।**

श्रीगुरुः शरणम्।

दत्तमालामंत्र

श्रीगणेशाय नमः। अस्य श्रीदत्तमालासंत्रस्य सदाशिव ऋषिः अनुष्टुप् छंदः(दैवी गायत्री छंदः) श्रीदत्तात्रेयो देवता।। द्रां बीजं द्रीं शक्तिः(ऱ्हीं शक्तिः) द्रुं कीलकं (क्रौं कीलकं) द्रैं ???? श्रीदत्तात्रेय(देवता)प्रीत्यर्थे जपे विनियोगः।

अथ अंगन्यासाः - सदाशिव ऋषये नमः शिरसि। दैवी गायत्री छंदाय नमः मुखे। श्रीदत्तात्रेयो देवताय नमः हृदि। द्रां बीजं नमः गुह्ये। ऱ्हीं शक्त्यै नमः पादयोः। क्रौं कीलकाय नमः नाभौ।

अथ करन्यासाः - ॐ द्रां अङ्‌गुष्ठाभ्यां नमः, ॐ द्रीं तर्जनीभ्यां नमः, ॐ द्रूं मध्यमाभ्यां नमः, ॐ द्रैं अनामिकाभ्यां नमः, ॐ द्रौं कनिष्ठिकाभ्यां नमः, ॐ द्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।

अथ अङ्‌गन्यासाः - ॐ द्रां हृदयाय नमः, ॐ द्रीं शिरसे स्वाहा, ॐ द्रूं शिखायै वषट्, ॐ द्रैं कवचाय हुं, ॐ द्रौं नेत्रत्रयाय वौषट्, ॐ द्रः अस्त्राय फट्। (इति दिग्बंधः।)

अथ ध्यानम्।

मालाकमंडलुरधःकरपद्मयुग्मे मध्यस्थपाणियुगुले डमरूत्रिशूले।
ऊर्ध्वस्थ यस्य करयोः शुभशंखचक्रे वन्दे तमत्रिवरदं भुजषट्कयुक्तम्।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।

अथ मंत्रः।

ॐ नमो भगवते दत्तात्रेयाय स्मरणमात्रसन्तुष्टाय महाभयनिवारणाय महाज्ञानप्रदाय चिदानन्दात्मने बालोन्मत्तपिशाचवेषाय महायोगिनेऽवधूतायानसूया-नन्दवर्धनायात्रिपुत्राय ॐ भवबन्धविमोचनाय आं असाध्यसाधनाय

ऱ्हीं सर्वविभूतिदाय क्रौं (क्रों) असाध्याकर्षणाय ऐं वाक्प्रदाय क्लीं जगत्त्रयवशीकरणाय सौः सर्वमनःक्षोभणाय श्रीं महासंपत्प्रदाय ग्लौं भूमण्डाधिपत्यप्रदाय द्रां चिरंजीविने वषड्वशीकुरु वशीकुरू वौषडाकर्षययाकर्षय हुं विद्वेषय विद्वेषय फट् उच्चाटयोच्चाटय ठः ठः स्तंभय स्तंभय खें खें मारय मारय नमः सम्पन्नय सम्पन्नय स्वाहा पोषय पोषय परमन्त्रपरयन्त्रपरतन्त्राणि छिंधि छिंधि ग्रहान्निवारय निवारय व्याधीन् विनाशय विनाशय दुःखं हर हर दारिद्रं विद्रावय विद्रावय देहं पोषय पोषय चित्तं तोषय तोषय सर्वमन्त्रस्वरूपाय सर्वयन्त्रस्वरूपाय सर्वतन्त्रस्वरूपाय सर्वपल्लवस्वरूपाय ॐ नमो महासिद्धाय स्वाहा।।

श्रीमद्दत्तपुराण ३:१


ॐ नमो भगवान्दत्तात्रेयः स्मरणमात्रसंतुष्टो।
महाभयनिवारणो महाज्ञानप्रदः।।५०।।
चिदानन्दात्मा बालोन्मत्तपिशाचवेषो।
महायोग्यवधूतोऽनसूयानन्दवर्धनोऽत्रिपुत्रः।।५१।।
ॐ बन्धविमोचनो ह्रीं सर्वविभूतिदः।
क्रों असाध्याकर्षण ऐं वाक्प्रदः।।५२।।
क्लीं जगत्त्रयवशीकरणः सौः सर्वमनःक्षोभणः।
श्रीं महासंपत्प्रदो ग्लौं भूमण्डलाधिपत्यप्रदः।।५३।।
द्रां चिरंजीवी वषड्वशीकुरु वौषडाकर्षय।
हुं विद्वेषय फडुच्चाटय ठः ठः।।५४।।
स्तम्भय खें खें मारय नमः संपन्नय।
स्वाहा पोषय परमन्त्रपरयन्त्रपरतन्त्राणि।।५५।।
छिन्धि ग्रहान्निवारय व्याधीन्विनाशय।
दुःखं हर दारिद्रं विद्रावय देहं पोषय।।५६।।
चित्तं तोषय सर्वमन्त्रस्वरूपः।
सर्वतन्त्रस्वरूपः सर्वपल्लवस्वरूपः।।५७।।
ॐ नमो महासिद्धः स्वाहान्तो मालामन्त्रः।
प्रथमान्तांश्चतुर्थ्या द्विः क्रियाश्च व्याहरेत्।।५८।।

देवेन्द्राणि मंत्र.

देवेंद्राणि नमस्तुभ्यं
देवेंद्रप्रियभामिनि
विवाहं भाग्यमारोग्य
पुत्रलाभं च देहि मे

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रिय भामिनि।
विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे।।

१. श्रीगणपतिमंत्र.


श्री: आचम्य प्राणानायम्य ममा
भीष्टार्थसिद्धिद्वारा श्रीगणपति
प्रीत्यर्थं तन्मंत्रजपमहं करिष्ये अस्य
मंत्रस्य गणक ऋषिः गायत्री छंदः श्रीग
णपतिर्देवता जपे विनियोगः ॐ गां अं
गुष्ठाभ्यां नमः ॐ गीं तर्जनीभ्यां नमः ॐ
गूं मध्यमाभ्यां गैं अनामिकाभ्यां ॐ गौं
कनिष्ठिकाभ्यां नमः ॐ गः करतलकरपृ
ष्ठाभ्यां नमः एवं हृदयादि ध्यानं। गजव
नमचिंत्यं० मानसोपचारैः संपूज्य जप।
ॐ गं गणपतये नमः १०८
पुनर्हृदयादिन्यासांते अनेन जपेन
श्रीगणपतिः प्रीयतां आचामेत्

गं गणपतये नमः

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) (संकल्प) **ममाभीष्टार्थसिद्धिद्वारा श्रीगणपतिप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

अस्य गणपतिमंत्रस्य गणक ऋषिः गायत्री छन्दः गणपतिर्देवता,जपे विनियोगः।

(करन्यास) **ॐ गं अङ्गुष्ठाभ्यां नमः, ॐ गीं तर्जनीभ्यां नमः, ॐ गूं मध्यमाभ्यां नमः, ॐ गैं अनामिकाभ्यां नमः, ॐ गौं कनिष्ठिकाभ्यां नमः, ॐ गः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।** (ॐ गं हृदयाय नमः, ॐ गीं शिरसे स्वाहा, ॐ गूं शिखायै वषट्, ॐ गैं कवचाय हुं, ॐ गौं नेत्रत्रयाय वौषट्, ॐ गः अस्त्राय फट्। इति दिग्बंधः।)

ध्यान गजवदनमचिंत्यं.....


मानसोपचारैः संपूज्य - (लं पृथिव्यात्मकं गंधं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। (मालां संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

गं गणपतये नमः। १०८

पुनर्हृदयादि न्यासान्ते (गं हृदयाय नमः, गीं शिरसे स्वाहा, गूं शिखायै वषट्, गैं कवचाय हुं, गौं नेत्रत्रयाय वौषट्, गः अस्त्राय फट्।) **अनेन जपेन श्रीगणपतिः प्रीयताम्। आचामेत्।**

श्रीगणपतिमंत्र. २



श्रीगुरुः शरणम्।

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य देशकालौ संकीर्त्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीगणपतिप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं

च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।) **वामपादतलेन भूमौ पातत्रयं कृत्वा ऊर्ध्वदृष्ट्या तालत्रयेण भूतान्युत्सार्य,**

अस्य गणपतिमंत्रस्य गणक ऋषिः गायत्री छन्दः गणपतिर्देवता, गं बीजं नाभौ नमः शक्तिः गणपतय इति कीलकम् जपे विनियोगः। गणक ऋषये नमः शिरसि, गायत्री छंदसे नमः मुखे, गणपतिदेवतायै नमः हृदये, गं बीजाय नमः नाभौ, नमः शक्तये नमः पादयोः, गणपतये इति कीलकाय नमः सर्वाङ्गे।

(करन्यास) **ॐ गं अङ्गुष्ठाभ्यां नमः, ॐ गीं तर्जनीभ्यां नमः, ॐ गूं मध्यमाभ्यां नमः, ॐ गैं अनामिकाभ्यां नमः, ॐ गौं कनिष्ठिकाभ्यां नमः, ॐ गः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास) **ॐ गं हृदयाय नमः, ॐ गीं शिरसे स्वाहा, ॐ गूं शिखायै वषट्, ॐ गैं कवचाय हुं, ॐ गौं नेत्रत्रयाय वौषट्, ॐ गः अस्त्राय फट्। इति दिग्बंधः।**

अथ ध्यानम्।

एकदंतं चतुर्हस्तं पाशमंकुशधारिणं रदं च वरदं हस्त स्तैर्बिभ्राणं मुषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससं रक्तगंधानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतं आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्।।१।।

मानसोपचारैः संपूज्य - (**लं पृथिव्यात्मकं गंधं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। (**मालां संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)


गं गणपतये नमः। १०८

जपान्ते मालां शिरसि निधाय पुनर्हृदयादि न्यासान्कृत्वा (गं हृदयाय नमः, गीं शिरसे स्वाहा, गूं शिखायै वषट्, गैं कवचाय हुं, गौं नेत्रत्रयाय वौषट्, गः अस्त्राय फट्।)

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।
अनेन जपेन सिद्धिबुद्धिसहितो महागणपतिः प्रीयताम्।

आचम्य आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)


ग्लौं मंत्र.


श्री:
मम वरिष्ठाधिकारिप्र
सादेनाभीष्टस्थानाधिका
रप्राप्तिद्वारा श्रीपरमे
श्वरप्रीत्यर्थं ग्लौमित्यस्य मं
त्रस्य जपं करिष्ये

मम वरिष्ठाधिकारिप्रसादेनाभीष्टस्थानाधिकारप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्लौमित्यस्य मंत्रस्य जपं करिष्ये।

श्रीगुरुः शरणम्।

श्रीहनुमान् मंत्र


श्रीदत्त। आचम्य प्राणानायम्य ममाभीष्टार्थसिध्धिद्वारा
सिधे द्वारा श्रीहनुमान् देवताप्रीत्यर्थं
जपमहं करिष्ये आसनादि कृत्वा अस्य श्री
हनुमन्मंत्रस्य ब्रह्मा ऋषिः। शिरसि। गायत्री
छंदः मुखे। श्रीरामदूतो हनुमान्देवता हृदये
हं बीजं नाभौ। नमः शक्तिः पादयोः हनुमत
इति कीलकं सर्वांगे। ह्रां अंगुष्ठाभ्यां नमः। ह्रीं
तर्जनीभ्यां नमः ह्रूं मध्यमाभ्यां नमः ह्रैं अना
मिकाभ्यां नमः ह्रौं कनिष्ठिकाभ्यां नमः। ह्रः करत
लकरपृष्ठाभ्यां नमः। ह्रां हृदयाय नमः। ह्रीं शिरसे
स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुं। ह्रौं नेत्रत्रय
यवौषट् ह्रः अस्त्राय फट् ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति
दिग्बंधः ध्यानं मनोजवं मा० मानसपूजा।।
लं पृथिव्यात्मकं गंधं परिकल्पयामि हं आकाशा
त्मकं पुष्पं। यं वाय्वात्मकं धूपं। रं अग्न्यात्मकं दीपं।
वं अमृतात्मकं नैवेद्यं। सं सर्वात्मकं सर्वोपचारा
न्परिकल्पयामि। ॐ [illegible]
मिं [illegible] येमिरे। आदित्ते विश्वा भुवनानि येमिरे
११ महामाये महामाये सर्वशक्तिस्वरूपिणि
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव
मंत्रः ॐ हं हनुमते नमः १०८ *
ॐ हृदयादिन्यासं ते मालां शिरसि निधाय उत्थ
तिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं। जपसिद्धि
र्भवतु मे त्वत्प्रसादात् महाकपे अनेन जपेन श्री
मारुति हनुमान्प्रीयतां
आसनाधो जलं सिंचा तेन ललाटे तिलकं
कुर्यात्

(श्रीदत्त। आचम्य केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीहनुमान् देवताप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि

मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य हनुमन्मंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छन्दः मुखे। श्रीरामदूतो हनुमान्देवता हृदये। हं बीजं नाभौ। नमः शक्तिः पादयोः। हनुमत इति कीलकम् सर्वांगे।

(करन्यास) **हां अंगुष्ठाभ्यां नमः। हीं तर्जनीभ्यां नमः। हूं मध्यमाभ्यां नमः। हैं अनामिकाभ्यां नमः। हौं कनिष्ठिकाभ्यां नमः। हः करतलकरपृष्ठाभ्यां नमः।**

(अङ्गन्यास) **हां हृदयाय नमः, हीं शिरसे स्वाहा, हूं शिखायै वषट्, हैं कवचाय हुं, हौं नेत्रत्रयाय वौषट्, हः अस्त्राय फट्। इति दिग्बंधः।**

ध्यानम्। मनोजवं मारुततुल्य वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ हं हनुमते नमः। १०८

पुनर्हृदयादि न्यासान्ते (हां हृदयाय नमः, हीं शिरसे स्वाहा, हूं शिखायै वषट्, हैं कवचाय हुं, हौं नेत्रत्रयाय वौषट्, हः अस्त्राय फट्।)


माला शिरसि निधाय -

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।

अनेन जपेन श्रीहनुमान्देवता प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

श्रीगुरुः शरणम्।

श्रीहनुमान मंत्र (२)



श्रीदत्त आचम्य प्राणानायम्य ममाभीष्टार्थसिद्धि द्वारा हनुमत्प्रीत्यर्थं तन्मंत्रजपमहं करिष्ये आसनादि कृत्वा अस्य मंत्रस्य रामऋषिः हनुमान्देवता धृतिश्छंदः जपे विनियोगः ॐ नमो अंगुष्ठाभ्यां नमः ॐ भगवते तर्जनीभ्यां नमः आंजनेयाय मध्यमाभ्यां नमः ॐ महाबलाय अनामिकाभ्यां नमः ॐ स्वाहा कनिष्ठिकाभ्यां नमः ॐ नमो भगवते आंजनेयाय महाबलाय स्वाहा करतलकरपृष्ठाभ्यां नमः एवं हृदयादि ध्यानं ... मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठं। वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये नमो भगवते आंजनेयाय महाबलाय

(श्रीदत्त। आचम्य केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीहनुमत्प्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य हनुमन्मंत्रस्य राम ऋषिः हनुमान्देवता धृति छन्दः जपे विनियोगः।

(करन्यास) **ॐ नमः अंगुष्ठाभ्यां नमः। ॐ भगवते तर्जनीभ्यां नमः। ॐ आंजनेयाय मध्यमाभ्यां नमः। ॐ महाबलाय अनामिकाभ्यां नमः। ॐ स्वाहा कनिष्ठिकाभ्यां नमः। ॐ नमो भगवत आंजनेयाय महाबलाय स्वाहा करतलकरपृष्ठाभ्यां नमः।** (अङ्गन्यास - ॐ नमः हृदयाय नमः, ॐ भगवते शिरसे स्वाहा, ॐ आंजनेयाय शिखायै वषट्, ॐ महाबलाय कवचाय हुं, ॐ स्वाहा नेत्रत्रयाय वौषट्, ॐ नमो भगवते आंजनेयाय महाबलाय स्वाहा अस्त्राय फट्। इति दिग्बंधः।)

ध्यानम्। मनोजवं मारुततुल्य वेगं जितेन्द्रियं बुद्धमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ नमो भगवत आंजनेयाय महाबलाय स्वाहा। १०८*

पुनर्हृदयादि न्यासान्ते (हां हृदयाय नमः, हीं शिरसे स्वाहा, हूं शिखायै वषट्, हैं कवचाय हुं, हौं नेत्रत्रयाय वौषट्, हः अस्त्राय फट्।)


माला शिरसि निधाय -

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।

अनेन जपेन श्रीहनुमान्देवता प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

* ह्या मंत्राचे खालील दोन विनियोग श्रीस्वामिमहाराजांच्या हस्ताक्षरांत लिहिलेले आहेत.
ॐ नमो भगवत आंजनेयाय महाबलायोन्मादप्रलापादि दोषान्छमय शमय।
ॐ नमो भगवत आंजनेयाय भो महाबल परयंत्रपरमंत्रपरतंत्राणि छिंधि छिंधि।

काकस्पर्शाशुद्धि।


मृत्युंजयायरुद्राय नीलकंठाय शंभवे। अमृतेशाय शर्वाय महादेवायते नमः १०८
शंकरास प्रदक्षिणा ३००


मृत्युंजयाय रुद्राय नीलकंठाय शंभवे।
अमृतेशाय शर्वाय महादेवाय ते नमः।। १०८
शंकरास प्रदक्षिणा ३००

श्रीकार्तवीर्य मंत्र।

श्रीः। मम विवादजयपूर्वक गतक्षेत्रलाभप्राप्तिद्वारा श्रीकार्तवीर्यप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। अस्य मंत्रस्य दत्तात्रेय ऋषिः गायत्रीछंदः कार्तवीर्यार्जुनो देवता जपे विनियोगः।

अथ ध्यानम् -

वामैः करैः पंचशतांश्च चापान् दक्षैः करैः पंचशतांस्तथेषून्।
दधानमानौमि सहस्त्रबाहुं श्रीकार्तवार्यार्जुनमिष्टकामदम्।।१।।


श्रीः ममाविवादविजयपूर्वक गतक्षेत्र
लाभप्राप्तिद्वारा श्रीकार्तवीर्यप्रीत्यर्थं
तन्मंत्रजपंकरिष्ये अस्यमंत्रस्य दत्तात्रे
यऋषिः गायत्रीछंदः कार्तवीर्यार्जुनोदेव
ताजपेविनियोगः मंत्र
ॐ फ्रों च्रीं क्लीं भ्रूं आं ऱ्हीं क्रों श्रीं
हुं फट् कार्तवीर्यायर्जुनायनमः ४००००
कार्तवीर्यार्जुनोनामराजाबाहुसहस्रवान्
तस्यस्मरणमात्रेणगतंनष्टंचलभ्यते ४००

मंत्र

ॐ फ्रों च्रीं क्लीं भ्रूं आं ऱ्हीं क्रों श्रीं हुं फट् कार्तवीर्यार्जुनाय नमः। ४००००

ॐकारापासून नमः पर्यंत मंत्र आहे. हा दिवा लावून रोज एक हजार प्रमाणे ४० दिवस जपावा. नंतर यथाशक्ति ब्राह्मणभोजन करावे.

कार्तवीर्याऽर्जुनो नाम राजा बाहुसहस्त्रवान्।
तस्य स्मरणमात्रेण गतं नष्टं च लभ्यते।। ४००

नमस्ते कार्तवीर्याय। हा तयाचा मंत्र होय। येणें सर्वारिष्ट क्षय। होय हा निश्चय जाणावा।। ९९।। प्रणवबीज लावून। जपतां होय भवबंधनोचन। ऱ्हींबीज लावून। जपतां सर्वेश्वर्य मिळेल।। १००।। ऐंबीज लावितां वाक्सिद्धी होई। सर्वविद्यापारंगत होई। लक्ष जपतां कार्यसिद्धी होई।

मंत्रशक्तिप्रभावें।। १०१।। श्रींबीजें लक्ष्मी मिळे। द्रांबीजें अपमृत्यु टळे। रोगपीडा पळे। आरोग्य मिळे निश्चयें।। १०२।। वषट्बीजें वशीकरण। वौषट्बीजें होई आकर्षण। हुंबीजें होई विद्वषेण। फट्बीजें उच्चाटण होतसे।। १०३।। ठः ठः बीजें होय स्तंभन। खें खें बीजें होय मारण। नमःबीजें होय संपन्न। होय पोषण स्वाहाबीजें।। १०४।। सौःबीजें होय क्षोभन। क्लींबीजें वशीकरण। ग्रहभूतादि निवारण। हुंफट्बीजें होईल।। १०५।। अक्षिरोग मेह सन्निपात। श्लेष्मज्वर क्षय कुष्ठ। गुल्म पैत्तिक वात। देशकालोत्थ संगज।। १०६।। हे रोग समस्त। किंवा त्रिविध उत्पात। प्रणवबीजें होती शांत। परप्रयोगाचा अंत होईल।। १०७।। दत्त निवेशित नष्ट प्रयुक्त। ते सहस्त्र जपें मिळे वित्त। घृतदीप लावून एकांत। जपतां साधे प्रयोग।। १०८।। श्लोक।। कार्तवीर्याऽर्जुनो नाम। राजा बाहुसहस्त्रवान्। तस्य स्मरणमात्रेण। गतं नष्टं च लभ्यते।। १०९।।


प.प. श्रीस्वामी महाराजांच्या हस्ताक्षरांत आणखी एक विधान उपलब्ध आहे. यांत मंत्राचा मात्र स्पष्ट उल्लेख नाही.

अस्य कार्तवीर्यार्जुनमंत्रस्य श्रीदत्तात्रेय ऋषिः शिरसि। गायत्रीछंदः मुखे। कार्तवीर्यार्जुनो देवता हृदये। फ्रों बीजं नाभौ। नमः शक्तिः पादयोः। कार्तवीर्यायेति कीलकं सर्वांगे। फ्रां अंगुष्ठाभ्यां नमः, फ्रीं तर्जनीभ्यां नमः, फ्रूं मध्यमाभ्यां नमः, फ्रैं अनामिकाभ्यां नमः, फ्रौं कनिष्ठिकाभ्यां नमः, फ्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि। (फ्रां हृदयाय नमः, फ्रीं शिरसे स्वाहा, फ्रूं शिखायै वषट्, फ्रैं कवचाय हुं, फ्रौं नेत्रत्रयाय वौषट्, फ्रः अस्त्राय फट्।) फ्रां फ्रीं फ्रूं फ्रैं फ्रौं फ्रः इति दिग्बंधः।

ध्यानम् - सहस्त्रबाहुं सशरं सचापं रक्तांबरं रक्तकिरीटकुंडलं।
चोरारिदुष्टभयनाशनाभीष्टदं तं ध्यायेन्महाबलविजृंभितकार्तवीर्यम्।।१।।

श्रीगुरुः शरणम्।

श्रीमल्लारि खंडराज (खंडेराय) मंत्र



श्रीदत्त। **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीमल्लारिप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छन्दः मुखे। श्रीमल्लारि खंडराजो देवता हृदये।

(करन्यास) **मां अङ्गुष्ठाभ्यां नमः, मीं तर्जनीभ्यां नमः, मूं मध्यमाभ्यां नमः, मैं अनामिकाभ्यां नमः, मौं कनिष्ठिकाभ्यां नमः, मः करतलकरपृष्ठाभ्यां नमः।**

(अङ्गन्यास) **मां हृदयाय नमः, मीं शिरसे स्वाहा, मूं शिखायै वषट्, मैं कवचाय हुं, मौं नेत्रत्रयाय वौषट्, मः अस्त्राय फट्। इति दिग्बंधः।**

अथ ध्यानम्। मणिमल्लारिमार्तंडं खंडराजं महामतिम्।
अवतीर्णं मणिगिरौ शिवं वंदेऽश्ववाहनम्।।*

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ नमो भगवते मणिमल्लारये खंडराजाय नमः। १०८

पुनर्हृदयादि न्यासान्ते (मां हृदयाय नमः, मीं शिरसे स्वाहा, मूं शिखायै वषट्, मैं कवचाय हुं, मौं नेत्रत्रयाय वौषट्, मः अस्त्राय फट्।) **माला शिरसि निधाय -**

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।

अनेन जपेन श्रीमणिमल्लारि खंडराजो प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)


* श्रीखंडेरायाची आणखी दोन ध्याने श्रीमहाराजांच्या हस्ताक्षरांत लिहिलेली आहेत.

१. अश्वारूढं शिवं साक्षान्मणिमल्लारिमर्दनम्।
महालसापतिं देवं खंडराजं नमाम्यहम्।।

ह्या ध्यानाबरोबर 'नमो भगवते खंडराजाय' हा मंत्र दिला आहे.

२. भूभारोत्तारणार्थाय अवतीर्णं स्वयं शिवम्।
वन्दे महालसाकान्तं मणिमल्लारिमीश्वरम्।।

कृष्णाय वासुदेवाय...


श्रीदत्त। आचम्य ममाभीष्टार्थसिद्धिद्वारा
श्रीविष्णुप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये ध्यानं
उद्यतादित्यसंकाशं पीतवाससमच्युतं।
चतुर्भुजं विशालाक्षं ध्यायेल्लक्ष्मीपतिं हरिं
कृष्णाय वासुदेवाय हरये परमात्मने
प्रणतक्लेशनाशाय गोविंदाय नमो नमः
अनेन जपेन श्री महाविष्णुः १०८।२८
प्रीयतां आचामेत

श्रीदत्त। आचम्य। ममाभीष्टार्थसिद्धिद्वारा श्रीविष्णुप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।

ध्यानम्

उद्यतादित्यसंकाशं पीतवाससमच्युतम्।
चतुर्भुजं विशालाक्षं ध्यायेल्लक्ष्मीपतिं हरिम्।।१।।


(मंत्र)**कृष्णाय वासुदेवाय हरये परमात्मने।**
प्रणतक्लेशनाशाय गोविंदाय नमः।। १०८।२८

अनेन जपेन श्रीमहाविष्णुः प्रीयताम्। आचामेत्।

मंत्र विधाने

श्रीगुरुः शरणम्।


श्रीमहालक्ष्मी मंत्र


श्रीदत्त
आचम्य प्राणानायम्य ममाभीष्टार्थ
सिद्धिद्वारा महालक्ष्मी प्रीत्यर्थं तन्मंत्र
जपं करिष्ये। आसनादि कृत्वा अस्य
श्रीलक्ष्मी मंत्रस्य भार्गव ऋषिः शिरसि।
गायत्री छंदः मुखे श्रीमहालक्ष्मीर्देवता
हृदये श्रीं बीजं नाभौ नमः शक्तिः पादयोः
ऐं कीलकं सर्वांगे। ॐ श्रीं अंगुष्ठाभ्यां न
मः ह्रीं तर्जनीभ्यां नमः ऐं मध्यमाभ्यां नमः
श्रीं अनामिकाभ्यां नमः ह्रीं कनिष्ठिकाभ्यां
नमः ऐं करतलकरपृष्ठाभ्यां नमः। श्रीं हृद
याय नमः ह्रीं शिरसे स्वाहा। ऐं शिखायै वषट्
श्रीं कवचाय हुं। ह्रीं नेत्रत्रयाय वौषट् ऐं
अस्त्राय फट् श्रीं ह्रीं ऐं इति दिग्बंधः
ध्यानं। अरुणकमलसंस्था तद्रजःपुंजवर्णा
करकमलधृतेष्टाभीतियुग्मांबुजा च।
मणिमुकुटविचित्रालंकृता कल्पजालैर्भव
तु भुवनमाता संततं श्रीः श्रियै नः। मातुलिं
गं गदां खेटं पानपात्रं च बिभ्रती। नागं लिं
गं च बिभ्रती नृपमूर्ध्नि। इति ध्यात्वा मा
नसोपचारैः संपूज्य॥

श्रीदत्त। आचम्य केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीमहालक्ष्मी**

देवताप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य लक्ष्मीमंत्रस्य भार्गव ऋषिः शिरसि। गायत्री छन्दः मुखे। श्रीमहालक्ष्मीर्देवता हृदये। श्रीं बीजं नाभौ। नमः शक्तिः पादयोः। ऐं कीलकम् सर्वांगे।


ॐ पृथिव्यात्मकं गंधं परिकल्पयामि। हं
आकाशात्मकं पुष्पं०। यं वाय्वात्मकं धूपं०।
रं अग्न्यात्मकं दीपं० वं अमृतात्मकं नैवे
द्यं० सं सर्वात्मकं सर्वोपचारान् परिकल्पया
मि। महामाये महामाले सर्वशक्तिस्वरू
पिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सि
द्धिदा भव मंत्रजपः
ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै
सिंहवाहिन्यै स्वाहा १०८
जपांते मालां शिरसि निधाय हृदयादि
न्यासान् कृत्वा गुह्यातिगुह्य गोप्त्री त्वं गृ
हाणास्मत्कृतं जपं। जपसिद्धिर्भवतु मे
त्वत्प्रसादान्महेश्वरि। अनेन जपेन श्री
महालक्ष्मीः प्रीयतां आचम्य आस
नाधो जलं क्षिप्त्वा तेन ललाटे तिलकं
कुर्यात्

(करन्यास) **ॐ श्रीं अंगुष्ठाभ्यां नमः। ऱ्हीं तर्जनीभ्यां नमः। ऐं मध्यमाभ्यां नमः। श्रीं अनामिकाभ्यां नमः। ऱ्हीं कनिष्ठिकाभ्यां नमः। ऐं करतलकरपृष्ठाभ्यां नमः।**

(अङ्गन्यास) **श्रीं हृदयाय नमः, ऱ्हीं शिरसे स्वाहा, ऐं शिखायै वषट्, श्रीं कवचाय हुं, ऱ्हीं नेत्रत्रयाय वौषट्, ऐं अस्त्राय फट्। श्रीं ऱ्हीं ऐं इति दिग्बंधः।**

ध्यानम्।

अरुणकमलसंस्था तद्रजःपुंजवर्णा करकमलधृतेष्टाभीतियुग्मांबुजा च।
मणिमुकुटविचित्रालंकृता कल्पजालैर्भवतु भुवनमाता संततं श्रीः श्रियै नः।।
मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती।
नागं लिंगं च योनिं च बिभ्रती नृपमूर्धनि।।

इति ध्यात्वा मानसोपचारैः संपूज्य -

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणी। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

मंत्रजपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ श्रीं ऱ्हीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यैः स्वाहा। १०८

जपांते माला शिरसि निधाय हृदयादि न्यासान्कृत्वा (श्रीं हृदयाय नमः, ऱ्हीं शिरसे स्वाहा, ऐं शिखायै वषट्, श्रीं कवचाय हुं, ऱ्हीं नेत्रत्रयाय वौषट्, ऐं अस्त्राय फट्। श्रीं ऱ्हीं ऐं इति दिग्बंधः।) -

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वरि।।


अनेन जपेन श्रीमहालक्ष्मीः प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीगुरुः शरणम्।

श्रीसिद्धिलक्ष्मी मंत्र

श्रीदत्त। आचम्य केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) प्राणानायम्य **(**संकल्प**) ममाभीष्टार्थविद्याप्राप्ति तत्परीक्षासिद्धिद्वाराभिमतधनलाभप्राप्त्या श्रीसिद्धिलक्ष्मी देवताप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)



अस्य मंत्रस्य भार्गव ऋषिः अनुष्टुप् छन्दः सिद्धिलक्ष्मीर्देवता जपे विनियोगः।

ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति न्यासः।

ध्यानम्।मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती। नागं लिंगं च बिभ्रती नृपमूर्धनि।।

इति ध्यात्वा मानसोपचारैः संपूज्य -

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

मंत्रजपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ श्रीं श्रियै नमः।

श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीं।


सर्वकामफलावाप्तिसाधनैकसुखावहाम्।। १०८

तीन महिनेपर्येंत जपून ब्राह्मण-सुवासिनीभोजन करून नंतर रोज १० जप. वरवर

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीगुरुः शरणम्।


श्रीविष्णु मंत्र


आचम्य ममाभीष्टार्थ
सिद्धिद्वारा श्रीविष्णु
प्रीत्यर्थं तन्मंत्रजपं करि
ष्ये अस्य मंत्रस्य विश्व
रूप ऋषिः। शिरसि। गा
यत्री छंदः मुखे। श्रील
क्ष्मीनारायणो देवता
हृदये जपे विनियोगः
उद्यदादित्यसंकाशं
पीतवाससमच्युतं।
चतुर्भुजं विशालाक्षं
ध्यायेल्लक्ष्मीपतिं हरिं

श्रीदत्त। **आचम्य** केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) प्राणानायम्य (संकल्प) **ममाभीष्टार्थसिद्धिद्वारा श्रीविष्णुप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।** आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य विश्वरूप ऋषिः शिरसि। गायत्री छन्दः मुखे। श्रीलक्ष्मीनारायणो देवता हृदये। जपे विनियोगः।

ध्यानम्। उद्यदादित्यसंकाशं पीतवाससमच्युतं।
चतुर्भुजं विशालाक्षं ध्यायेल्लक्ष्मीपतिं हरिम्।।


नमो नारायणाय
१०८
अनेन जपेन श्री
विष्णुः प्रीयतां आ
चमेत
शोषणं पापपंकस्य
दीपनं ज्ञानतेजसः
गुरोः पादोदकं चित्रं
पुत्रपौत्रप्रवर्धनं

इति ध्यात्वा

मंत्रजपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

नमो नारायणाय। १०८


जपांते माला शिरसि निधाय -


अनेन जपेन श्रीविष्णुः प्रीयताम्। आचामेत्।
शोषणं पापंकस्य दीपनं ज्ञानतेजसः।
गुरोः पादोदकं चित्रं पुत्रपौत्रप्रवर्धनम्।।

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीरेणुकादेवी मंत्र.

श्रीः


आचम्य प्राणानायम्य मम अभीष्टार्थसि-
द्ध्यर्थं श्रीरेणुकादेवताप्रीत्यर्थं तन्मं-
त्रजपमहं करिष्ये। आसनादिकं कृत्वा अ-
स्य मंत्रस्य भार्गव ऋषिः शिरसि। गायत्री
छंदः मुखे। देवी देवता हृदये। ह्रीं बी-
जं नाभौः नमः शक्तिः पादयोः। भुवने-
श्वर्यै कीलकं सर्वांगे ओं ह्रां अंगु-
ष्ठाभ्यां नमः ओं ह्रीं तर्जनीभ्यां नमः
ओं ह्रूं मध्यमाभ्यां नमः ओं ह्रैं अनामि-
काभ्यां नमः ह्रौं कनिष्ठिकाभ्यां नमः
ओं ह्रः करतलकरपृष्ठाभ्यां नमः। ए-
वं हृदयादि। ध्यानं। प्रसादसुमुखीं
देवीमेकवीरां सुरेश्वरीं। भक्ता-
भीष्टप्रदां नित्यं रेणुकां चिंतयाम्यहं।
इति


महामाये महामाले सर्वशक्तिस्वरूपिणि। चतुर्वर्ग-
स्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव —— जपः
ओं ह्रीं नमो भुवनेश्वर्यै १०८ पुनर्हृदयादि
न्यासं। ते मालां शिरसि निधाय गुह्यातिगुह्यगोप्त्री त्वं
गृहाणास्मत्कृतं जपं। जपसिद्धिर्भवतु मे त्वत्प्रसादा-
न्महेश्वरि। अनेन जपेन श्रीरेणुका प्रीयतां। दुर्गे स्मृ-
ता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिम-
तीव शुभां ददासि। दारिद्र्यदुःखभयहारिणि का
त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता।
आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कु-
र्यात्

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। प्राणानायम्य देशकालौ संकीर्त्य संकल्प)

ममाभीष्टार्थसिद्धिद्वारा श्रीकुलदेवताप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।) **वामपादतलेन भूमौ पातत्रयं कृत्वा ऊर्ध्वदृष्ट्या तालत्रयेण भूतान्युत्सार्य,**

अस्य मंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छन्दः मुखे। देवी देवता हृदये। ऱ्हीं बीजं नाभौ। नमः शक्तिः पादयोः। भुवनेश्वर्यै इति कीलकम् सर्वाङ्गे।

(करन्यास) **ॐ ऱ्हां अङ्गुष्ठाभ्यां नमः, ॐ ऱ्हीं तर्जनीभ्यां नमः, ॐ ऱ्हूं मध्यमाभ्यां नमः, ॐ ऱ्हैं अनामिकाभ्यां नमः, ॐ ऱ्हौं कनिष्ठिकाभ्यां नमः, ॐ ऱ्हः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।**

(अङ्गन्यास ॐ ऱ्हां हृदयाय नमः, ॐ ऱ्हीं शिरसे स्वाहा, ॐ ऱ्हूं शिखायै वषट्, ॐ ऱ्हैं कवचाय हुं, ॐ ऱ्हौं नेत्रत्रयाय वौषट्, ॐ ऱ्हः अस्त्राय फट्।

अथ ध्यानम्।

प्रसीद सुमुखीं देवीमेकवीरां सुरेश्वरीम्।
भक्ताभीष्टप्रदां नित्यां रेणुकां चिन्तयाम्यहम्।।१।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ ऱ्हीं नमो भुवनेश्वर्यै। १०८

जपान्ते मालां शिरसि निधाय पुनर्हृदयादि न्यासान्कृत्वा (मां हृदयाय

नमः, मीं शिरसे स्वाहा, मूं शिखायै वषट्, मैं कवचाय हुं, मौं नेत्रत्रयाय वौषट्, मः अस्त्राय फट्।)

अनेन जपेन श्रीरेणुका कुलदेवता प्रीयताम्।
गुह्यातिगुह्यगोप्ता(प्त्री) त्वं गृहाणास्मत्कृतं जपम्।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।।
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता।।

(आचामेत्।) **आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्।** (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

श्रीरेणुकादेवी मंत्र. २

श्रीदत्त। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। प्राणानायम्य देशकालौ संकीर्त्य संकल्प) **ममाभीष्टार्थसिद्धिद्वारा श्रीकुलदेवताप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

अस्य मंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छन्दः मुखे। देवी देवता हृदये।

अथ ध्यानम्।
प्रसीद सुमुखीं देवीमेकवीरां सुरेश्वरीम्।
भक्ताभीष्टप्रदां नित्यां रेणुकां चिन्तयाम्यहम्।।१।।

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

नमो भगवति रेणुकेऽभीष्टं देहि देहि। १०८

अनेन जपेन श्रीरेणुका कुलदेवता प्रीयताम्।
आचम्य। (आचामेत्।).

श्री दत्त

आचम्य ममाभीष्टार्थसिंध्दा
रा श्रीकुलदेवता रेणुकाप्रीत्यर्थं तन्मं
त्रजपमहं करिष्ये अस्य श्री रेणुकामंत्र
स्य ब्रह्माऋषि: । शिरसि । गायत्री छंद:
मुखे । रेणुका देवता हृदये । ध्यानं । प्रसा
द सुमुखी देवी मेकवीरां सुरेश्वरीं ।
भक्ताभीष्टप्रदायिनीं रेणुकां चिंत
याम्यहं । नित्यं


नमो भगवति रेणुके भी व्हें दे
हि देहि १०८

अनेन जपेन श्री रेणुका कुल
देवता प्रीयतां

आचम्म्य

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्री नवार्ण मंत्र



अस्य नवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। गायत्र्युष्णिगनिष्टुप् छंदांसि। महाकाली महालक्ष्मी महासरस्वतीरूपि रेणुका देवता। ऐं बीजं ऱ्हीं शक्तिः। क्लीं कीलकं। श्रीकुलदेवीप्रसादसिद्ध्यर्थे जपे विनियोगः।

ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि। गायत्र्युष्णिगनुष्टुप् छंदेभ्यो नमः मुखे। महाकाली महालक्ष्मी महासरस्वतीरूपि रेणुका देवतायै नमः हृदये। ऐं बीजाय नमः गुह्ये। ऱ्हीं शक्तये नमः पादयोः। क्लीं कीलकाय नमः सर्वांगे।

(करन्यासाः) **ऐं अंगुष्ठाभ्यां नमः। ऱ्हीं तर्जनीभ्यां नमः। क्लीं मध्यमाभ्यां नमः। चामुंडायै अनामिकाभ्यां नमः। विच्चे कनिष्ठिकाभ्यां नमः। ऐं ऱ्हीं क्लीं चामुंडायै विच्चे करतलकरपृष्ठाभ्यां नमः।**

(अंगन्यास)**ऐं हृदयाय नमः। ऱ्हीं शिरसे स्वाहा। क्लीं शिखायै वषट्। चामुंडायै कवचाय हुं। विच्चे नेत्रत्रयाय वौषट्। ऐं ऱ्हीं क्लीं चामुंडायै विच्चे अस्त्राय फट् ।**

ऐं नमः शिखायां। ऱ्हीं नमो दक्षिणनेत्रे। क्लीं नमः वामनेत्रे। चां नमः दक्षिणकर्णे। मुं नमो वामकर्णे। डां नमः दक्षिणनासापुटे। यैं नमः वामनासापुटे। विं नमः मुखे। च्चें नमः गुह्ये। ऐं नमः प्राच्यै। ऱ्हीं नम आग्नेयै। क्लीं नमो दक्षिणायै। चां नमो नैर्ऋत्यै। मुं नमः प्रतीच्यै। डां नमो वायव्यै। यैं नम उदीच्यै। विच्चें नम

ऐशान्यां। ऐं ऱ्हीं क्लीं चामुंडायै विच्चे नमो ऊर्ध्वे।

अथ ध्यानम्।

जमदग्निप्रियां देवीं रेणुकां राममातरं।

एकवीरां परां शक्तिं प्रसीद सुमुखीं भजे।।

मानसपूजा लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणी। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

ऐं कवचाय हुं। विच्चे नेत्रत्रयाय वौषट्। ऐं ह्रीं
क्लीं चामुंडायै विच्चे अस्त्राय फट्। ऐं नमः शिखा
यां। ह्रीं नमो दक्षिणनेत्रे। क्लीं नमः वामनेत्रे चां नमः
दक्षिणकर्णे। डां नमः दक्षिणनासापुटे। यैं नमः वा
मनासापुटे। विं नमः मुखे च्चें नमः गुह्ये। ऐं नमः प्राच्यै।
ह्रीं नम आग्नेय्यै। क्लीं नमो दक्षिणायै। चां नमो नैर्ऋत्यै
चे मुं नमः प्रतीच्यै। डां नमो वायव्यै। यैं नम उदीच्यै। विच्चे नम
ऐशान्यां। ऐं ह्रीं क्लीं चामुंडायै विच्चे नमः। ऐं ह्रीं
क्लीं चामुंडायै विच्चे भूर्ध्वे नमः। अथ ध्यानं। जमद
ग्निप्रियां देवीं रेणुकां राममातरं। एकवीरां परां
शक्तिं प्रसीद सुमुखीं भजे १

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ऐं ऱ्हीं क्लीं चामुंडायै विच्चे। १०८

जपांते पुनर्हृदयादि न्यासान्कृत्वा (ऐं हृदयाय नमः। ऱ्हीं शिरसे स्वाहा। क्लीं शिखायै वषट्। चामुंडायै कवचाय हुं। विच्चे नेत्रत्रयाय वौषट्। ऐं ऱ्हीं क्लीं चामुंडायै विच्चे अस्त्राय फट् ।) **माला शिरसि निधाय -**

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।

जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वरी।।

अनेन जपेन श्रीकुलदेवता प्रीयताम्।

आचामेत्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)


प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

दुर्गे स्मृता..।

आचम्य प्राणानायम्य ममेप्सितकामनासिद्धिपूर्वक श्रीकुलदेवताप्रसादसिद्ध्यर्थं दुर्गे स्मृतेति मंत्रस्याष्टोत्तरशतसंख्याक जपमहं करिष्ये।


ॐ श्रीं ऱ्हीं क्लीं

दुर्गे स्मृता हरसि भीतिमशेषजंतोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।।
दारिद्र्यदुःखभयहारणिका त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता।। १०८


आचम्य प्राणानायम्य ममेप्सितकाम
नासिद्धिपूर्वक श्रीकुलदेवताप्रसादसि
ध्यर्थं दुर्गे स्मृतेति मंत्रस्याष्टोत्तरश
तसंख्याक जपमहं करिष्ये। ॐ श्रीं ह्रीं
क्लीं दुर्गे स्मृता हरसि भीतिमशेषजं
तोः स्वस्थैः स्मृता मतिमतीव शुभां
ददासि।। दारिद्र्य दुःखभयहारिणिका
त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता। १०८

श्रीगुरुः शरणम्।


नरसिंह अष्टाक्षरी मंत्र


नरसिंहाष्टाक्षरी
आचम्य प्राणानायम्य ममाभीष्टसिद्धिद्वा
रा श्रीलक्ष्मीनृसिंहप्रीत्यर्थं तन्मंत्रजपमहं करि
ष्ये आसनादि कृत्वा अस्य मंत्रस्य ब्रह्मा ऋषिः शि
रसि। गायत्री छंदः मुखे श्रीलक्ष्मीनृसिंह देव
ता हृदये। क्ष्रौं बीजं नाभौ नमः शक्तिः पाद
योः नरसिंहायेति कीलकं सर्वांगे। ॐ क्ष्रां
अंगुष्ठाभ्यां नमः। ॐ क्ष्रीं तर्जनीभ्यां नमः ॐ
क्ष्रूं मध्यमाभ्यां नमः ॐ क्ष्रैं अनामिकाभ्यां नमः ॐ
क्ष्रौं कनिष्ठिकाभ्यां नमः ॐ क्ष्रः करतलकरपृष्ठा
भ्यां नमः ॐ क्ष्रां हृदयाय नमः। ॐ क्ष्रीं शिरसे
स्वाहा ॐ क्ष्रूं शिखायै वषट् ॐ क्ष्रैं कवचा
य हुं ॐ क्ष्रौं नेत्रत्रयाय वौषट् ॐ क्ष्रः अस्त्रा
य फट् ॐ क्ष्रां क्ष्रीं क्ष्रूं क्ष्रैं क्ष्रौं क्ष्रः इति दिग्ब
धः अथ ध्यानं। वागीशा यस्य वदने लक्ष्मी
र्यस्य च वक्षसि यस्यास्ते हृदये संवित्

श्रीः। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य (**संकल्प**) ममाभीष्टसिद्धिद्वारा श्रीलक्ष्मीनृसिंहप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छंदः मुखे। श्रीलक्ष्मीनृसिंह देवता हृदये। क्ष्रौं बीजं नाभौ। नमः शक्तिः पादयोः। नरसिंहायेति कीलकम् सर्वांगे।



रूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मा
न्मे सिद्धिदा भव मंत्रः
ॐ क्ष्रौं नरसिंहाय नमः १०८
पुनः हृदयादिन्यासः। मालां शिरसि
निधाय यतः घ्रातिगुह्यगोप्ता त्वं गृहाण
स्मत्कृतं जपं। जपसिद्धिर्भवतु मे त्वत्प्र
सादात्। अनादिना अनेन जपेन श्रीलक्ष्मी
नृसिंह देवता प्रीयतां प्रातर्नृसिंहश्चापि
नानृसिंहः स्वामी नृसिंहः स्वजनो नृ
सिंहः। ममापि सर्वस्वमयं नृसिंहस्त्वं नृ
सिंहेश्वर मे प्रसीद। आसनाधो जलं
क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्

(करन्यास) **ॐ क्ष्रां अङ्गुष्ठाभ्यां नमः, ॐ क्ष्रीं तर्जनीभ्यां नमः, ॐ क्ष्रूं मध्यमाभ्यां नमः, ॐ क्ष्रैं अनामिकाभ्यां नमः, ॐ क्ष्रौं कनिष्ठिकाभ्यां नमः, ॐ क्ष्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।** (अङ्गन्यास) - **ॐ क्ष्रां हृदयाय नमः, ॐ क्ष्रीं शिरसे स्वाहा, ॐ क्ष्रूं शिखायै वषट्, ॐ क्ष्रैं कवचाय हुं, ॐ क्ष्रौं नेत्रत्रयाय वौषट्, ॐ क्ष्रः अस्त्राय फट्। ॐ क्ष्रां क्ष्रीं क्ष्रैं क्ष्रौं क्ष्रः इति दिग्बंधः।**

अथ ध्यानम्। वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे।।

लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ क्ष्रौं नरसिंहाय नमः। १०८

जपान्ते पुनर्हृदयादि न्यासान्कृत्वा (ॐ क्ष्रां हृदयाय नमः, ॐ क्ष्रीं शिरसे स्वाहा, ॐ क्ष्रूं शिखायै वषट्, ॐ क्ष्रैं कवचाय हुं, ॐ क्ष्रौं नेत्रत्रयाय वौषट्, ॐ क्ष्रः अस्त्राय फट्।) **मालां शिरसि निधाय**

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। जपसिद्धिर्भवतु मे त्वत्प्रसादाज्जनार्दन।।

अनेन जपेन श्रीलक्ष्मीनृसिंह देवता प्रीयताम्।

माता नृसिंहश्च पिता नृसिंहः स्वामी नृसिंहः स्वजनो नृसिंहः।

ममापि सर्वस्वमयं नृसिंहः स त्वं नृसिंहेश्वर मे प्रसीद।।

आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा).

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्री लक्ष्मीवेंकटेश मंत्र

श्रीदत्त। **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य** (संकल्प) **देशकालौ संकीर्त्य ममाभीष्टसिद्धिद्वारा श्रीलक्ष्मीवेंकटेशप्रसादसिद्ध्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य ब्रह्मा ऋषिः शिरसि। उष्णिक् छंदः मुखे। श्रीलक्ष्मीवेंकटेश देवता हृदये। श्रीं बीजं नाभौ ऱ्हीं शक्तिः पादयोः। क्लीं कीलकं सर्वांगे।

(करन्यासाः) **ॐ श्रीं अंगुष्ठाभ्यां नमः। ॐ ऱ्हीं तर्जनीभ्यां नमः। ॐ क्लीं मध्यमाभ्यां नमः। ॐ श्रीं अनामिकाभ्यां नमः। ॐ ऱ्हीं कनिष्ठिकाभ्यां नमः। ॐ क्लीं करतलकरपृष्ठाभ्यां नमः।**

(अंगन्यास)**ॐ श्रीं हृदयाय नमः। ॐ ऱ्हीं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ श्रीं कवचाय हुं। ॐ नेत्रत्रयाय वौषट्। ॐ क्लीं अस्त्राय फट्। ॐ श्रीं ऱ्हीं क्लीं इति दिग्बंधः।**

अथ ध्यानम्। **श्रीवेंकटेशमानौमि शेषाचलनिवासिनम्।**
पद्मावतीसमश्लिष्टं पातवस्त्रं चतुर्भुजम्।।

मानसपूजा लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।

मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**


जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

श्रीं ऱ्हीं क्लीं वेंकटेशाय नमः। १०८

जपांते पुनर्हृदयादि न्यासान्कृत्वा (ॐ श्रीं हृदयाय नमः। ॐ ऱ्हीं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ श्रीं कवचाय हुं। ॐ नेत्रत्रयाय वौषट्। ॐ क्लीं अस्त्राय फट् । ॐ श्रीं ऱ्हीं क्लीं इति दिग्बंधः।) **माला शिरसि निधाय - गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। जपसिद्धिर्भवतु मे त्वत्प्रसादाज्जनार्दन।।**

॥ श्रीलक्ष्मीव्यंकटेश मंत्रम् ॥

आचम्यप्राणानायम्य देशकालौसंकीर्त्य
ममाभिष्टार्थसिद्धि द्वारा श्रीवेंकटेशप्रसाद
(लक्ष्मी)
सिध्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा।
अस्यमंत्रस्य ब्रह्मा ऋषि: शिरसि। उष्णिक्छंद:
मुखे। श्रीलक्ष्मीवेंकटेशदेवता हृदये। श्रीबीजं
नाभौ ह्रीं शक्ति: पादयो:। क्लीं कीलकं सर्वांगे
ॐ श्रीं अंगुष्ठाभ्यांनम:। ॐ ह्रीं तर्जनीभ्यांनम:
ॐ क्लीं मध्यमाभ्यां नम: ॐ श्रीं अनामिकाभ्यांनम:। ॐ
ह्रीं कनिष्ठिकाभ्यांनम:। ॐ क्लीं करतलकरपृष्ठाभ्यां
नम:। ॐ श्रीं हृदयाय नम: ॐ ह्रीं शिरसे स्वाहा ॐ
क्लीं शिखायै वषट् ॐ श्रीं कवचाय हुं ॐ ह्रीं ने
त्रत्रयाय वौषट् ॐ क्लीं अस्त्राय फट् ॐ श्रीं
ह्रीं क्लीं इति दिग्बंध:। अथ ध्या
नं। श्रीवेंकटेशमानौमि [illegible]षाचलनिवासिनं
पद्मावती समाश्लिष्टं पीतवस्त्रं चतुर्भुजं ॥ मान
सपूजा। लं पृथिव्यात्मकं गंधं परिकल्पयामि। हं
आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं
धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिक



अनेन जपेन श्रीलक्ष्मीव्यंकटेश प्रीयताम्।

दुःस्वप्न-दुःशकुन-दुर्गति-दौर्मनस्य-दुर्भिक्ष-दुर्व्यसन-दुःसह-दुर्यशांसि।

उत्पाततापविषभीतिमसद्ग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः।।

यो लोकरक्षार्थमिहावतीर्य वैकुंठलोकात्सुरवर्य वर्यः।

शेषाचले तिष्ठति योऽनवद्ये तं वेंकटेशं शरणं प्रपद्ये।।१।।

पद्मावतीमानसराजहंसः। कृपाकटाक्षानुगृहीत हंसः।

हंसात्मादिष्ट निजस्वभावस्तं वेंकटेशं शरणं प्रपद्ये।।२।।

प्रसीद लक्ष्मीरमण प्रसीद प्रसीद शेषाद्रिशय प्रसीद।

दारिद्र्यदुःखाधिभयं हरन्तं तं वेंकटेशं शरणं प्रपद्ये।।३।।

आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्।


गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।

गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः।।

आचामेत्।

श्रीगुरुः शरणम्।

श्रीमहाविष्णुमंत्र।



श्रीः। आचम्य (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य देशकालौ संकीर्त्य (**संकल्प**) ममाभीष्टार्थसिद्धिद्वारा श्रीमहाविष्णुप्रीत्यर्थं द्वादशाक्षरिमंत्रजपमहं करिष्ये।**

आसनादि कृत्वा (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु


शिवाज्ञया।।४।।)

अस्य द्वादशाक्षरिमंत्रस्य विश्वरूप ऋषिः शिरसि। जगती छन्दः मुखे। श्रीवासुदेवो देवता हृदये। ॐ बीजं नाभौ। नमः शक्तिः पादयोः। वासुदेवायेति कीलकम् सर्वांगे।

(करन्यास) **ॐ गोविंदाय नमः अङ्गुष्ठाभ्यां नमः। ॐ महीधराय नमः तर्जनीभ्यां नमः। ॐ हृषीकेशाय नमः मध्यमाभ्यां नमः। ॐ त्रिविक्रमाय नमः अनामिकाभ्यां नमः। ॐ विष्णवे नमः कनिष्ठिकाभ्यां नमः। ॐ माधवाय नमः करतलकरपृष्ठाभ्यां नमः।**

(अङ्गन्यास) **ॐ गोविंदाय नमः हृदयाय नमः। ॐ महीधराय नमः शिरसे स्वाहा। ॐ हृषीकेशाय नमः शिखायै वषट्। ॐ त्रिविक्रमाय नमः कवचाय हुं। ॐ विष्णवे नमः नेत्रत्रयाय वौषट्। ॐ माधवाय नमः अस्त्राय फट्।**

पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे।
प्रद्युम्नः पश्चिमायां तु वासुदेवस्तथोत्तरे।।
ईशान्यां वामनः पातु तथाग्नेयां जनार्दनः।
नैर्ऋत्यां पद्मनाभस्तु वायव्यां मधुसूदन।।१।।


उद्यतादित्यसंकाशं
पीतवाससमच्युतं।
चतुर्भुजंविशालाक्षं
ध्यायेलक्ष्मीपतिंहरिं

(अथ ध्यानम्)

उद्यतादित्यसंकाशं पीतवाससमच्युतम्।
चतुर्भुजं विशालाक्षं ध्याये लक्ष्मीपतिं हरिम्।।१।।

इति ध्यात्वा लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं

परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) **महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।**

जपः (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ नमो भगवते वासुदेवाय। १०८


पुनर्हृदयादि न्यासः (ॐ गोविंदाय नमः हृदयाय नमः। ॐ महीधराय नमः शिरसे स्वाहा। ॐ हृषीकेशाय नमः शिखायै वषट्। ॐ त्रिविक्रमाय नमः कवचाय हुं। ॐ विष्णवे नमः नेत्रत्रयाय वौषट्। ॐ माधवाय नमः अस्त्राय फट्।) **मालां शिरसि निधाय -**

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।
अनेन जपेन श्रीवासुदेवः प्रीयताम्।

आचम्य आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीरामचंद्र मंत्र


आचम्य ममाभीष्टार्थ सिद्धि
द्वारा श्रीसीतारामचंद्रदेव प्री
त्यर्थं तन्मंत्रजपमहं करिष्ये
ध्यानं। दक्षिणे लक्ष्मणो। यस्य वा
मे च जनकात्मजा। पुरतो। मारु
तिर्यस्य तं वंदे रघुनंदनं।
मंत्र
नमोभगवते रामचंद्राय

अनेन जापेन श्रीसीता
रामचंद्रदेवताप्रीयतां।

(श्रीदत्त।) **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। (प्राणानायम्य संकल्प) **ममाभीष्टसिद्धिद्वारा श्रीसीतारामचंद्रदेव**(ता)**प्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।** (आसनादि कृत्वा पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवी पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षी मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अथ ध्यानम्। दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा। पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्।।

(लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि। मालां (संपूज्य) महामाले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।)

मंत्र (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)


नमो भगवते रामचंद्राय। १०८

(माला शिरसि निधाय -)

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। जपसिद्धिर्भवतु मे त्वत्प्रसादान्महेश्वर।।

अनेन जपेन श्रीसीतारामचंद्रदेवता प्रीयताम्। (आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

श्रीविष्णुमंत्र.


श्रीदत्त। आचम्य ममाभीष्टार्थसिद्धिद्वारा
श्रीविष्णुप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये ध्यानं
उद्यतादित्यसंकाशं पीतवाससमच्युतं।
चतुर्भुजं विशालाक्षं ध्यायेल्लक्ष्मीपतिं हरिं
कृष्णायवासुदेवायहरयेपरमात्मने
प्रणतक्लेशनाशायगोविंदायनमोनमः
अनेनजपेनश्रीमहाविष्णुः १०८।२८
प्रीयतां आचामेत

श्रीदत्त। **आचम्य** (केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः।) **प्राणानायम्य देशकालौ संकीर्त्य** (संकल्प) **ममाभीष्टार्थसिद्धिद्वारा श्रीविष्णुप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।**

ध्यानम्

उद्यतादित्यसंकाशं पीतवाससमच्युतम्।

चतुर्भुजं विशालाक्षं ध्याये लक्ष्मीपतिं हरिम्।।१।।

मंत्र

कृष्णाय वासुदेवाय हरये परमात्मने।


प्रणतक्लेशनाशाय गोविन्दाय नमो नमः।।

अनेन जपेन श्रीवासुदेवः प्रीयताम्। आचामेत्।

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीगुरुः शरणम्।

पंचाक्षरी शिवमंत्र



श्रीदत्त। केशवायनमः नारायणायनमः
माधवायनमः ० श्रीगुरुभ्योनमः ममा-
भीष्टार्थसिध्दिद्वारा श्रीसांबसदाशिवप्रीत्य-
र्थं तन्मंत्रजपमहं करिष्ये आसने उपविश्य
अस्यमंत्रस्य वामदेव ऋषिःशिरसि। गायत्री
छंदः मुखे। श्रीसांबसदाशिवो देवता हृदये
नं अंगुष्ठाभ्यांनमः मं तर्जनीभ्यां नमः। शिं मध्यमा
भ्यांनमः। वां अनामिकाभ्यां नमः यं कनिष्ठिकाभ्यां
नमः।नमःशिवाय करतलकरपृष्ठाभ्यांनमः। नं
हृदयायनमः। मं शिरसे नमः। शिं शिखायै नमः
वां कवचायनमः। यं नेत्रत्रयायनमः नमःशि
वाय अस्त्रायनमः। शि
वायनम इति दिग्बंधः

श्रीदत्त। **(आचमन)** केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। **(प्राणानायम्य) (संकल्प) ममाभीष्टसिद्धिद्वारा श्रीसांबसदाशिवप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसने उपविश्य** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य वामदेव ऋषिः शिरसि। गायत्री छन्दः मुखे। साम्बसदाशिवो देवता हृदये।

(करन्यास) नं अङ्गुष्ठाभ्यां नमः, मं तर्जनीभ्यां नमः, शिं मध्यमाभ्यां नमः, वां अनामिकाभ्यां नमः, यं कनिष्ठिकाभ्यां नमः, नमः शिवाय करतलकरपृष्ठाभ्यां नमः।

(अङ्गन्यास) नं हृदयाय नमः, मं शिरसे नमः, शिं शिखायै नमः, वां कवचाय नमः, यं नेत्रत्रयाय नमः, नमः शिवाय अस्त्राय नमः। शिवाय नम इति दिग्बंधः।


अथध्यानं। नमःशिवाय सांबाय सगणा
य ससूनवे। सनंदिने सगंगाय सचंद्राय
नमो नमः। मानसपूजां कृत्वा। जपं कुर्यात्
नमःशिवाय १०८ नं हृदयाय नमः। मं शि
रसे नमः। शिं शिखायै नमः। वां कवचाय न
मः। यं नेत्रत्रयाय नमः। नमःशिवाय अस्त्रा
य नमः अनेन जपेन श्री सांबसदाशिव
देवता प्रीयतां आचम्य आसनाधो
जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्

अथ ध्यानम्। नमः साम्बाय शिवाय सगणाय ससूनवे। सनन्दिने सगङ्गाय सचन्द्राय नमो नमः।

मानसपूजां कृत्य (लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।)

जपं कुर्यात् (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा) **नमः शिवाय १०८**


नं हृदयाय नमः मं शिरसे नमः शिं शिखायै नमः वां कवचाय नमः यं नेत्रत्रयाय नमः नमः शिवाय अस्त्राय नमः।

अनेन जपेन श्रीसाम्बसदाशिवदेवता प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)

प.प.श्रीवासुदेवानंदसरस्वतीप्रणीत

श्रीगुरुः शरणम्।

षडक्षरी शिवमंत्र


श्रीदत्त। आचम्य प्राणानायम्य ममा
भीष्टार्थसिद्धिद्वारा श्रीसांबसदाशिव
प्रीत्यर्थं तन्मंत्रजपमहं करिष्ये आसना
दि कृत्वा अस्य मन्त्रस्य वामदेव ऋषिः शि
रसि। गायत्री छंदः मुखे श्रीसांबसदा
शिवो देवता हृदये ओंबीजं नाभौ। नमः
शक्तिः पादयोः। शिवायेति कीलकं सर्वांगे
ॐ अंगुष्ठाभ्यां नमः। नं तर्जनीभ्यां नमः
मं मध्यमाभ्यां नमः। शिं अनामिकाभ्यां नमः
। वां कनिष्ठिकाभ्यां नमः। यं करतलकरपृ
ष्ठाभ्यां नमः। ॐ हृदयाय नमः। नं शिर
से स्वाहा। मं शिखायै वषट्। शिं कवचाय
हुं। वां नेत्रत्रयाय वौषट्। यं अस्त्राय फट्
ध्यानं नमः शिवाय सांबाय सगणाय ससु
तास्त्रवे सनंदिने सगंगाय वृषेंद्राय
नमो नमः

श्रीदत्त। **(आचमन)** केशवाय नमः नारायणाय नमः माधवाय नमः...श्रीगुरुभ्यो नमः। **(प्राणानायम्य) (संकल्प) ममाभीष्टसिद्धिद्वारा श्रीसांबसदाशिवप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये। आसनादि कृत्वा** (पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।१।। ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षिणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते)।।२।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन जपकर्म समारभे।।३।। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।।४।।)

अस्य मंत्रस्य वामदेव ऋषिः शिरसि। गायत्री छन्दः मुखे। साम्बसदाशिवो देवता हृदये। ॐ बीजं नाभौ। नमः शक्तिः पादयोः।

शिवायेति कीलकं सर्वांगे।

(करन्यास) ॐ अङ्गुष्ठाभ्यां नमः, नं तर्जनीभ्यां नमः, मं मध्यमाभ्यां नमः, शिं अनामिकाभ्यां नमः, वां कनिष्ठिकाभ्यां नमः, यं करतलकरपृष्ठाभ्यां नमः।

(अङ्गन्यास) ॐ हृदयाय नमः, नं शिरसे स्वाहा, मं शिखायै वषट्, शिं कवचाय हुं, वां नेत्रत्रयाय वौषट्, यं अस्त्राय फट्।

अथ ध्यानम्। नमः साम्बाय शिवाय सगणाय ससूनवे।
सनन्दिने सगङ्गाय सचन्द्राय नमो नमः।

मानसपूजां कृत्य (लं पृथिव्यात्मकं गन्धं परिकल्पयामि। हं आकाशात्मकं पुष्पं परिकल्पयामि। यं वातात्मकं धूपं परिकल्पयामि। रं अग्न्यात्मकं दीपं परिकल्पयामि। वं अमृतात्मकं नैवेद्यं परिकल्पयामि। सं सर्वात्मकं सर्वोपचारान् परिकल्पयामि।)


जपं कुर्यात् (पुढील मंत्राचा कमीत कमी १०८ वेळां जप करावा)

ॐ नमः शिवाय १०८

ॐ हृदयाय नमः, नं शिरसे स्वाहा, मं शिखायै वषट्, शिं कवचाय हुं, वां नेत्रत्रयाय वौषट्, यं अस्त्राय फट्।

अनेन जपेन श्रीसाम्बसदाशिवदेवता प्रीयताम्। आसनाधो जलं क्षिप्त्वा तेन ललाटे तिलकं कुर्यात्। (आसनाखाली पाणी टाकून त्याने कपाळावर टिळा लावावा)


सरस्वतीमंत्र.


ॐ ऐं नमः अशेषवाग्जाड्यतमो
पहंत्री नवं नवं स्पष्ट सुवा
क्यदायिनी। ममेहजिह्वा
ग्रसुरंगनर्तकीभवप्रस
न्नावदने मम श्रीः

नमस्ते शारदे देवि
सरस्वतिमतिप्रदे
वसत्वं ममजिह्वाग्रे
सर्वविद्याप्रदाभव
१०८

ॐ ऐं नमः अशेषवाग्जाड्यतमोऽपहन्त्री
नवं नवं स्पष्ट सुवाक्यदायिनी।
ममेहजिह्वाग्रसुरंगनर्तकी
भव प्रसन्ना वदने मम श्रीः।।१।।
नमस्ते शारदे देवि सरस्वति मतिप्रदे।
वस त्वं मम जिह्वाग्रे सर्वविद्याप्रदा भव।।२।।

ऋणमोचन मंत्र.


ऋणपरिहारार्थ
अत्रेरात्मप्रदानेन योमु
क्तो भगवान्णात् । दत्ता
त्रेयं तमीशानं नमामि
ऋणमुक्तये
१,००,०००
१ लक्षसंख्या

अत्रेरात्मप्रदानेन यो मुक्तो भगवानृणात्।
दत्तात्रेयं तमीशानं नमामि ऋणमुक्तये।।

१००,०००

सुखप्रसूतीसाठी मंत्र.

ॐ क्षीं स्वाहा।

तिळाचे तेल वाटीत घेऊन त्यावदूर्वा ठेवून हा मंत्र १०८ वेळां जपून ते तेल योनीस लेप दिल्यास लवकर प्रसूती होते. हा मंत्र ब्राह्मण स्त्रीकरितांच आहे.

सर्व जातीकरितां

श्रुतं हवं मेऽश्विनौ द्राक् सप्तवध्रिं च मुञ्चतं।
नाथमानमृषिं भीतं दशमास्यं यथासुखम्।।

या मंत्राने १२ वेळ मंत्रवून पाणी पिणेस द्यावे. सुखाने प्रसूति होते.

सुखप्रसूतीवर
ॐ क्षीं स्वाहा - तीळ चेतक्या टितं घेवून त्यावर
दृष्टी टेवून या मंत्र २१ वेळ जपून ते तेळ-
योनीस रूपाटिल्यास सुखकर प्रसुती होते हा मंत्र
ब्राह्मणस्त्रीकरिताच आहे-
सर्वजातींकरितां-
श्रुतं ह्वं मेश्विनौ द्राक्ससंबाध्रिंवमुंचतं नाथ
मानमृपिंभीतं दस्रमास्यं यथासुखं - या मं
त्राने २१ वेळ मंत्रवून पाणी पिंनेस द्यावे-
सुखाने प्रसूति होते-
तीडक्या बंद होणेकरितां
हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणी - य
स्याः स्मरण मात्रेण विशल्या गर्भिणी भवेत्
या मंत्राने २१ वेळ पाणी मंत्रून द्यावे तिडक्या
बंद होतात - कमि दिवस असतां याच मंत्रा
ने तेडकी आकाड्यास मंत्रवून पिणेस द्या
वे गर्भ ठळतो पुनः ठरतो तेडकी कडुल्या
वी तीनामिळाली तर गोड व्हावी तीचो रसएवं
ढा मोठी असोन जितुके महिने झाले अस
तील तितुके गाठी द्यावे - २॥

तिडक्या बंद होणेकरितां

हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणी।

यस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्।।

या मंत्राने १२ वेळ पाणी मंत्रवून पिणेस द्यावे. तिडक्या बंद होतात. कमा दिवस असल्यास तेंडलीच्या काड्या(चा) रस मंत्रवून पिणेस द्या. गर्भ ढळला तरी पुन्हां ठरतो. तेंडली कडू घ्यावी. ती न मिळाली तर गोड घ्यावी. ती बोराएवढी मोठी असावी. जितुके महिने झाले असतील तितुके गाठी द्यावे.


ऋष्यशऋंग मंत्र.

आचम्य प्राणानायम्य सद्यः सुवृष्टिप्राप्तिद्वारा ऋष्यशऋंगरूपि परमेश्वरप्रीत्यर्थं तन्मंत्रजपमहं करिष्ये।

ऋष्यशृंगाय मुनये विभांडकसुताय च।
नमः शांताधिपतये सद्यः सद्वृष्टिहेतवे।।

संकटायोगिनी मंत्र.

श्रीदत्त। मम संकटायोगिनीमहादशासूचित विविधव्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थं क्षिप्रावारोग्यावाप्त्यर्थं संकटायोगिनीरूप परमेश्वरप्रीत्यर्थं द्वात्रिंशत्संख्याक संकटायोगिनीमंत्रजपमहं करिष्ये।


श्रीदत्त। मम संकटायोगिनी महादशा
सूचितविविधव्याधेर्जीवच्छरीराविरो
धेनसमूलनाशार्थं क्षिप्रारोग्यावाप्त्य
र्थं संकटायोगिनीरूपपरमेश्वरप्रीत्य
र्थं द्वात्रिंशत्सहस्रसंख्याक संकटायोगिनी
मंत्रजपं करिष्ये अस्य संकटायोगिनीमं
त्रस्य सदाशिव ऋषिः अतिजगती छंदः
संकटायोगिनी देवता सौः बीजं
नमः शक्तिः संकटे इति कीलकं जपे वि
नियोगः ॐ सां अंगुष्ठाभ्यां नमः

अस्य संकटायोगिनीमंत्रस्य सदाशिव ऋषिः अतिजगती छंदः संकटायोगिनी देवता सौः बीजं नमः शक्तिः संकटे इति कीलकं जपे विनियोगः।

ॐ सां अंगुष्ठाभ्यां नमः। सीं तर्जनीभ्यां नमः। सूं मध्यमाभ्यां नमः। सैं अनामिकाभ्यां नमः। सौं कनिष्ठिकाभ्यां नमः। सः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि। (ॐ सां हृदयाय नमः। सीं शिरसे स्वाहा। सूं शिखायै वषट्। सैं कवचाय हुं। सौं नेत्रत्रयाय वौषट्। सः अस्त्राय फट्।**)**

सीं तर्जनीभ्यां नमः। सूं मध्यमाभ्यां नमः
सैं अनामिकाभ्यां नमः सौं कनिष्ठिकाभ्यां नमः
सः करतलकरपृष्ठाभ्यां नमः एवं हृदयादि०
मंत्रः ॐ सौः संकटे रोगं मे नाशय नमः ३२०००
पुनर्न्यासान्कृत्वा निवेद्याचामेत्

मंत्र ॐ सौः संकटे रोगं मे नाशय नमः

३२०००

पुनर्न्यासान्कृत्वा निवेद्याचामेत्। (ॐ सां हृदयाय नमः। सीं शिरसे स्वाहा। सूं शिखायै वषट्। सैं कवचाय हुं। सौं नेत्रत्रयाय वौषट्। सः अस्त्राय फट्। अनेन जपेन श्रीसंकटायोगिनी प्रीयताम्।**)**